॥ श्रीः ॥

जयकृष्णदास आयुर्वेद ग्रन्थमाला

१२

नागार्जुनविरचिता

योगरत्नमाला

श्वेताम्बरभिक्षुगुणाकरकृतविवृतिसहिता

सम्पादकः

आचार्य प्रियव्रत शर्मा

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

वाराणसी (भारत)

॥ श्रीः ॥

जयकृष्णदास आयुर्वेद ग्रन्थमाला

११

नागार्जुनविरचिता

योगरत्नमाला

श्रीसिद्धघटीयश्वेताम्बरभिक्षुगुणाकरकृत-
लघुविवृतिसंवलिता

काशीहिन्दूविश्वविद्यालयीय-द्रव्यगुणविभागाध्यक्षेण
आचार्यप्रियव्रतशर्मणा संपादिता

चौखम्भा ओरियन्टालिया
पो० आ० चौखम्भा, पो० बाक्स नं० ३२
वाराणसी (भारत)

प्रकाशक

चौखम्भा ओरियन्टालिया

प्राच्यविद्या तथा दुर्लभ ग्रन्थों के प्रकाशक-विक्रेता

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

गोकुल भवन के. ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

फोन : ६३०२२ टेलीग्राम : गोकुलोत्सव

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९७७

मूल्य रु० १०–००

अन्यतम प्राप्तिस्थान :—

चौखम्भा विश्वभारती

चौक (चित्रा सिनेमा के सामने)

वाराणसी

फोन : ६५४४४

JAIKRISHNADAS AYURVEDA SERIES
NO. 11

NĀGĀRJUNA'S

YOGARATNAMĀLĀ

With

The Commentary of Śvetāmbara Bhikṣu Guṇākara

Edited by
Prof. PRIYAVRAT SHARMA
Senior Professor and Head, Department of Dravyaguna,
President, Society for History of Medicine,
Formerly Director, Postgraduate Institute of Indian Medicine,
Banaras Hindu University, Varanasi

CHAUKHAMBHA ORIENTALIA
VARANASI (INDIA)

Publishers :

CHAUKHAMBHA ORIENTALIA

A House of Oriental and Antiquarian Books

P. O. Chaukhambha, Post Box No. 32

Gokul Bhawan, K. 37/109, Gopal Mandir Lane

VARANASI-221001 (India)

Telephone : 63022 Telegram : Gokulotsav

© *Chaukhambha Orientalia*

First Edition 1977

Price Rs. 10-00

Printers—Vidya Vilas Press, Varanasi.

आचार्य प्रियव्रत शर्मा

INTRODUCTION

The Yogaratnamālā of Nāgārjuna is more or less now a forgotten work though it is important historically. The text was published in 1914 by Venkateswara Press, Bombay[1] but not seen today. Nāgārjuna has remained a mysterious identity in the history of medicine, philosophy, alchemy as well as tantricism and it would be worth-while to examine this text which is undoubtedly by Nāgārjuna from this point of view. The commentary on this text by Guṇākara is also important because departing from the traditional Indian Practice he has given the date of his work (1239 A. D.) at the end of the commentary. Based on this, the illustrious indologist, Dr. A. R. Hoernle[2] has fixed the date of Vijayarakṣita, the author of the Madhukoṣa commentary on the Rugviniścaya of Mādhava as about 1240 A. D. because he (Vijayarakṣita) has also quoted Guṇākara[3]. Keeping such historical importance of the text as well as the commentary the present edition of the work is being brought out.

1. *Title of the work :*

The title of the work is variously mentioned in different catalogues such as:—

1. Raghavan : New Catalogus Catalogorum, Vol. II, 1966.
2. Studies in the Medicine of Ancient India, Part I, Section 1, Introduction.
3. Madhukoṣa, Mādhavanidāna, V, 7.

1. Āścaryayogamālā (Baroda, Udaipur, Raghavan)
2. Āscarya Yogaratnamālā (Baroda)
3. Yogaratnamālā (Saraswati Bhavan)
4. Yogamālā (Saraswati Bhavan)
5. Mahākautuka (B. H. U.)
6. Kautukatantra („)

The difficulty is that the author has said it as 'Yogaratnamālā' in the beginning (verse 2) but at the end he has mentioned it as 'Āscaryratnamālā (verse 140). The title is meaningful as the text contains a collection of valuable formulae and recipes and is like a necklace of prceious jewels. As the recipes are miraculous it is also called as Āścaryayogamālā, a collection of miraculous recipes. But on the evidence of initial verse supported by the introductory verse of the commentator, the actual title of the work seems to be Yogaratnamālā which is preferred in the present edition.

2. *Materials for the text :*

The basic material was procured from the Mithila Research Institute, Darbhanga but this Ms. contained only 120 verses while from other sources it was evident that the text should have 140 verses. Hence for comparison and completion of the text the following other Mss. Were consulted :—

1. Saraswati Bhavan Varanasi — Ms. No. 44791 and 45134.
2. Banaras Hindu Uuiversity — Ms. No. B 1002 and B 603.

The following Mss. have been taken for textual comparison :—

1. Mithila Research Institute Darbhanga, accn. No. 3009 (mentioned as Yogaratnāvalī)
2. Saraswati Bhavan, Varanasi. Ms. sl. No. 44791.
   Size—9.8 by 3.8 in.
   Extent—26 leaves, 9 lines to a leave, 43 letters to a line, complete.
   Script—Devanāgarī.
3. B. H. U., Varanasi—Ms. accn. No. 131002, Sl, No. 26/10240
   Size—20.8 × 12.0 cm.
   Extent—16 leaves, incomplete.
   Script—Devanāgarī,
   Date—1967 Sam.

The Mss. of Yogaratnamālā or Āścaryayogamālā are found in various parts of the country as mentioned in several catalogues[1]. Raghavan[2] has given the following information on this item :—

> "Āścaryayogamālā in 140 verses. See also under Yoga. By Nāgārjuna, Pupil of Bhāskara. Bik., B. O. R. I , Mithila, Udaipur, Pub. Venkateśwara Press, Bombay, 1914".

3. *Subject matter and the contents :*

This text has been included under Tantra, Āyurveda, Yoga or Indrajāla. In Baroda Catalogue there are two Mss—one under Tantra (Sl. No. 46) and the

---

1. Darbhaṅgā Samskrit University, Cover No. 337. Also see—A Checklist of Samskrit Medical Manuscript, item Nos. 1055-1057.
2. Raghavan : Op. cit.

other under Āyurveda (Sl. 37). B. H. U. catalogue has described it under Indrajāla as well as Tantra.

Similarly, there is variation in number of verses in different Mss. Baroda mentions the number of Granthas as 450 (Tantra Ms.) and 400 (Ayurveda Ms.) As said earlier, the Darbhanga Ms. contains only 120 verses while other Mss. contain 140 verses. On corroborative evidences, the total number of verses seems to be 140

One strange thing is that verse No. 70 is repeated as verse No. 124. All the Poona Mss. also have the same readings[1].

The Contents of the text are of various nature such as Medical, Tantric and Mesmeric. There are certain formulae which have been claimed by the author as effective oral contraceptive (V. 89–92) which deserve scientific trial. Similarly, there is one formula for sterility (V. 85–86).

4. *Style and Textual peculiarity :*

The text is composed althourgh in Āryā meter. The language is quite refined and poetic. Simili, metaphors, allegories and other poetic embellishments have been used extensively. The first two verses can be quoted in this respect :

"विमलमतिकिरणनिकरप्रभिन्नसच्छिष्यकमलसंघाताः ।
सकलजगदेकदीपा जयन्ति गुरुभास्करा भुवने ।।"
"स्पष्टाक्षरपदसूत्रैर्गुरुमतरत्नाकरात् समुद्धृत्य ।
ग्रथिता परिस्फुरन्ती निगद्यते योगरत्नमालेयम् ।।"

---

1. Personal communication by Dr. G. K. Bhat, Director, P. G. and Research Deptt., B. O. R. I., Poona.

5. *The Author and his date :*

The author of this work is Nāgārjuna as mentioned in colophon as well as the introductory verse of the commentary. Nāgārjuna the author of this work was a disciple of Bhāskara who has been eulogised in the first verse (जयन्ति गुरुभास्करा भुवने).

The same verse indicates that Bhāskara was a great scholar commanding universal respect and had a large number of brilliant students. No other information si available about either Bhāskara or Nāgārjuna. Let us consider them one by one.

Bhāskara–There is one Bhāskara or Bhāskara Bhaṭṭa, the author of the Suśruta Pañjikā, who has been referred by Dallaṇa, the commentator on Suśruta[1].

The other Bhāskara was the father of Soḍhala and the grandfather of Śārṅgadeva, the author of Saṅgītaratnākara. As mentioned by Śārṅgadeva himself, Bhāskara was senior contemporary of Bhillama, the founder king of the Yadava dynasty of Devagiri who ruled from 1175 to 1191 A. D. His son, Soḍhala, lived during the reigns of Bhillam, Jaitra (1191-1210 A. D.) and Singhaṇa[2] (1210-1247 A. D.)[3]. Thus this Bhāskara may be existing nearabout 1150 A. D. Because of having quoted Cakrapāṇidatta (1075 A. D.), Dallaṇa is placed after him in 12th Cent. A. D. Most

---

1. तेन श्रीजेज्जटं टीकाकारं गयदासभास्करौ च पञ्जिकाकारौ...उपनीय ···निबन्धसंग्रहः क्रियते ।—उपक्रमभाग, डल्हणव्याख्या
2. Saṅgītaratnākara, Vol. 1, Ch. 1, 2-13, 119. Adyar Library, Madras, 1933.
3. G. Yazdani : Early History of the Deccon, Vol. I, Pt. VIII, P. 513.

probably this Bhāskara and Dallaṇa were contemporaries. But as Bhāskara, the author of Pañjikā, has been referred by Dallaṇa he difinitely precedes him with a long gap and may be placed in 11th or 10th Cent. A. D.[1] This fact differentiates between two Bhāskaras with a gap of about a century.

Bhāskara is mentioned alongwith Nāgārjuna as one of the 27 siddhas expert in iatrochemistry in the Rasaratnasamuccaya[2], a work of 13th Cent. A. D. Evidently all the authors referred in it belong latest to early 13th Cent. A. D.[3]. So it is not improbable that Sodhala's father himself was an expert in Rasa Sāstra and author of Rasendrabhāskara as well.

Little is known about the disciples of Bhāskara though there are some informations about those of the junior Bhāskara. His son, Soḍhala was also one of his pupils as he often remembers 'Bhānu' (Bhāskara) with profound regard[4]. There is strange resemblance in the valedictory verses of Soḍhala and Nagārjuna as well[5].

---

1. According to Hoernle, Bhāskara is identified as Kārtika Kuṇḍa, King Bhoja had given the title of Vidyāpati to Bhāskara Bhaṭṭa as a Patna inscription (E. I. 1. 340, 345) says. See—S. N. Das Gupta's 'A History of Indian Philosophy', Vol. II (1961), p. 427.
2. He is also mentioned as initiator of परहितरस in कुष्ठाधिकार,
3. There is mention of Simghana (1210-1247 A. D.) which may be taken as the lower limit. See my Āyurveda Kā Vaijñānika Itihāsa, P. 460.
4. सोढलाख्यो भिषग्भानुपादपंकजषट्पदः—गुणसंग्रह
5. सकलजगदेकदीपा जयन्ति गुरुभास्करा भुवने–योगरत्नमाला
'जयति जगदेकदीपस्तमोनदीयान्तरालपतितस्य'—नामसंग्रह

Again Keśava, the father of Vopadeva and the author of Siddhamantra has clearly stated that he received the knowledge of Ayurveda from Bhāskara. It is well known that Vopadeva was a contemporary of Hemādri who was prime minister to Yadava Kings Mahādeva (1260–1271 A. D.) and Ramcandra (1271–1309). Thus Keśava must be contemporary of Soḍhala and junior to Bhāskara. His teacher also may be none else but Soḍhala's father and teacher. Looking to such galaxy of scholar students of Bhāskara it prompts to place Ñāgārjuna the author of this work also as one of them.

It is also not improbable that some other Nāgārjuna may be a tantrika under the Jaina-sect whom Gunākara a Jain monk, has followed. But Tantriçism has remained quite a secular field where people from various conflicting religious traditions assembled under one shade realising perfect solace and happiness.

Nāgārjuna :

There are several Nāgārjunas placed in different periods of time. The following are important ones :—

1. Nāgārjuna, the philosopher and profounder of Mādhyamika Buddhism and contemporary of Kaniska (1–2 Cent. A. D.).

2. Nāgārjuna, the contemporary of Satavahan king, Gautamīputra Śātakarṇi or Yajñaśrī (178–207 A. D.) and teacher of Āryadeva, the 14th religious Head of Buddhists.

3. Nāgārjuna, belonging to the Gupta Period (4-5 Cent. A. D.).

4. Siddha Nāgārjuna (9th Cent. A. D.) the disciple of Sarahapā[1] senior contemporary of Naropa who was teacher of Mar-Pa and Atisa Dipankara[2] (10th Cent. A. D.).
5. Nāgārjuna, the Author of Yogaratnamālā (12th-Cent. A. D.).

Work of Nāgārjuna :

Various works are attributed to Nāgārjuna of which some are Philosophical and others are medical or tantric. The Philosophical works like Mādhyamika Kārikā, Vigraha-Vyāvartanī, Ratnāvalī, Dwadaśa-mukha Śāstra are probably of Nāgārjuna, the Philosopher (1–2 Cent. A.D.). There is also Rasavaiśesika of Bhadanta Nāgārjuna. Nāgārjuna is also said to the redactor of Suśruta Samhitā[3]. Nāgārjuna's name is also associated with Laubaśāstra[4] (Iron metallurgy). These aspects of medical learning are related to one Nāgārjuna who belonged to the Gupta period.

Mahaprajñā Pāramitā Śāstra is also an important work which contains matters relating to iatrochemistry and magic. Rasaratnākara and Rasendra-maṅgala are are also taken as work of Nāgārjuna.

The Kaccha (Kaksa?) Puṭa Tantra is also ascribed to Nāgārjuna. This work contains subject matter

---

1. Rahul Sankrtyayaṇa : int., Dohākoṣa, Patnā., 1957.
2. R. K. Chaudhary : The University of Vikramaśīla, p. 29, 40, The Bihara Research Society, Patna, 1975.
3. के० सच्चिदानन्द मूर्तिः नागार्जुन, पृ० ३७—३८, नेशनल बुकट्रस्ट, इण्डिया, नई दिल्ली, १९७१ ।
4. See—S. N. Dasgupta : A History of Indian Philosophy, 1961, Vol. II.

similar to that of the Yogaratnamālā. Several Verses and formulae are the same in both the works. For instance, the following verse of the Kchhapuṭa Tantra may be compared with the similar verse of the Yogaratnamālā :—

"जलूकमेषमण्डूकवसामादाय मेलयेत् ।
अनया लिप्तगात्रस्तु नाग्निना दह्यते नरः ।." —कक्षपुट
"जलूकापाटलीमूलं शैवालकुसुमं समम् ।
मण्डूकवसया पिष्टं लिप्तगात्रो न दह्यते ॥" —थोगरत्नमाला

The colophons contain the name of Nāgārjuna as the author of the work such as :—

"इति श्रीसिद्धनागार्जुनविरचिते कच्छपुटे पतिवश्यं नाम पंचमः पटलः ।"

It is probable that the author of the Yogaratnamālā also wrote the Kacchapuṭa Tantra. The Yogaśataka (text contanining hundred formulae) is also ascribed to Siddha Nāgārjuna. The work contains recipes arranged according to eight specialities of Āyurveda. Peculiarly Pañcakarma has replaced Vājīkaraṇa among Aṣṭāṅgas. The work is translated into Tibetan which contains the mention of authorship of Siddha Nāgārjuna in the colophon to the end of the text[1], But apart from this, there is no any material difference in the text from that by Vararuci. Yogaśataka has been quoted by Niścalakara (13th Cent. A. D.) and Cakrapāṇi (11th Cent. A D.) and as such is earlier than that. Its several verses are found in Cakradaṭṭa (11th Cent. A. D.) and Vṛndamādhava (9–10th Cent. A. D). There is also similarity in the arrangement of subject matter between Yogaśātaka and Tīsaṭa's Cikitsākalikā. Hence

1. Vaidya Bhagwan Dash : Ph. D. Thesis, Delhi University, 1975,

this work may be ascribed to Siddha Nāgārjuna belonging to 9th Cent. A. D. Nāgārjuna's other two works Pañcasūtra and Bheṣajakalpa are also trans'ated in Tibetan and contained in Tanjor collections. Vārtamālā and Yogamañjari of Nāgārjuna are also quoted by Niścalakara.

6. *Commentary :*

There is mention of the Amṛtaratnāvalī commentary in Gujarati by Guṇākara in the Yogaratnamālā[1] but the popular commentary on this work is known as 'Laghu Vivṛti' by Guṇākara who was a Jain monk of Swetāmbara sect. He composed this commentary in the year 1239 A.D. as mentioned by him at the end of the book. Taking this as a landmark, Dr. Hoernle has fixed the date of Vijayarakṣita as 1240 A. D. because he has quoted Guṇākara in his commentary. Dr. D. C. Bhattacharya has refuted this on the argument that Guṇākara quoted by Vijayaraksita is a person different from that who commented upon the Yogaratnamālā. He assumes that Guṇākara quoted by Vijayarakṣita may be a physician while the other one may be a tantric or a magician[2]. But this argument does not stand after a close scrutiny which reveals that Guṇākara the commentator has ably snown his scholarship while interpreting the medicinal plants and drugs. Bhattacharya has mentioned a commentary (vṛtti) on the Caraka Saṁhita by Guṇākara quoted by

1. The checklist of medical manuscripts (C. C. R. I. M. & H., New Delhi), Sl. No. 1055.
2. D. C. Bhattācharya, New Light on Vaidyaka Literature, I. H. Q., Vol. XXIII, No. 1, March, 1947, pp. 123-155.

Niścala Kara. It is difficult to prove that the Jain Guṇākāra is not the commentator of the Caraka Saṁhita. In other words, tt can't be said that the commentator of the Yogaratnamālā can't comment upon the Caraka Saṁhitā rather the reverse may be true.

It seems that Guṇākarā belonged to the Tantric sect of Nāgārjuna and also practised magical charms and tantricism that is why he has explained the tantric methods which are only briefly indicated in the verse. It was not possible for a person unconnected with the tradition to give such explanation. He has also interpreted the words as they were accepted and practised in the tradition. Keeping this in mind, set the textual readings have been set. For instance, in verse 3, the reading 'भवनचटककंकुष्ठम्' may be kept in two ways :—

१—भवनचटककंकुष्ठम्

२—भवनचकटकं कुष्ठम्

In the former reading it will denote भवनचटक and कंकुष्ठ (a purgative drug) while in the latter one it will denote भवनचटकक and कुष्ठ (a drug growing in Kashmir). I pondered seriously over this but decided following the commentary which is probably based on traditional practice. Perhaps कुष्ठ and not कंकुष्ठ was taken for this in practice.

There are other instances where apparently things have been mistaken such as :–

अहिंस्रा = शरपुंखा (v. 55)
मुनिवृक्ष = पलाश (v. 65)

हरितरु = अश्वत्थ or अर्कवृक्ष (v. 114)

बोधितरु = न्यग्रोध (v. 115)

Actually हिस्रा, अगस्ति, न्यग्रोध and अश्वत्थ are taken respectively by the above terms. In the last two cases, there is also possibility of transcriptional error by which place of अश्वत्थ and न्यग्रोध might have been changed. न्यग्रोध and अश्वत्थ is the correct order.

On the basis of these instances, it is very difficult to decide whether it shows the deficient knowledge of the author in the field of drugs or the same interpretation was prevalent in tantric practices.

7. *Authors quoted in the commentary :*

The following authors have been quoted in the commentary :—

१—हलिनी लांगली प्रोक्ता पिप्पली चेति कोशः । (p. 6)

२—गन्धकी गन्धकः गन्धपाषाणेति पर्यायः । (p. 12)

३—स्योनाकः पृथुशिम्बः स्यात् शुकनासः कुटन्नटः ।
भूतवृक्षश्च कट्वङ्गष्टुण्टुकः सल्लकोऽरलुरिति द्रव्यगुणः । (p. 15)

8 *Local names mentioned in the commentary :*

The following local names of drugs are found in the commentary :—

१—अञ्जन = सुरमा (p. 31)

२—अतिबला = ककही (p. 28)

३—इङ्गुदी = इङ्गुवा (p. 10)

४—गोवत्सा = गोजिभी (p 26)

५—बला = बरियारा (p. 28)

६—भल्लातक = भेला (p. 21)

७—मधुयष्टी = जेठीमधु (p. 28)

८—रसांजन = रसवत (p. 9)

९—लांगली = करिहारी (p. 6)

१०—स्तब्ध = बोडथरी (p. 37)

११—स्तब्धा = बोडी कल्हारी (p. 12)

१२—स्नुही = थोहरी (p. 25, 33)

Besides these, there is कोइला for अंगारिका (p. 130.) About भूनाग, it has been said that it is called as अणसला in Saurashtra and केचुआ in Kānyakubja (p. 27.). There is also 'गरी' for 'फलगर्भ' (p. 45)

As most of the these words are prevalent in Gujarat the commentator seems to be a resident of that region.

I am highly grateful to the Director, Mithila Research Institute, Darbhanga for having sent me a transcribed copy of the maunscript prepared by Pt. Amarendra Jha. I am also thankful to the Librarians of the B. H. U. Central Library, Bharat Kala Bhaven and Saraswati Bhavan Varanasi for permitting me to consult the Manuscripts.

Banaras Hindu University
January 1, 1977

— P. V. Sharma

प्रकरण-सूची

		श्लोकसंख्या
१	वश्याधिकारः	३-६
२	विद्वेषणाधिकारः	७-१०
३	उच्चाटनम्	११-१४
४	दर्पणे रूपदर्शनम्	१५-१८
५	चित्ररोदनान्तर्धानम	१९-२२
६	पुरुषान्तर्धानम्	२३-३०
७	कौतूहलानि	३१-३८
८	अग्निस्तम्भः	३९-४२
९	जलस्तम्भः	४३-४६
१०	पिशाचीकरणम्	४७-५०
११	लोमशातनम्	५१-५४
१२	शस्त्रस्तम्भः	५५-५८
१३	देशान्तरगमनम्	५९-६२
१४	अकालग्रहणम्	६३-६७
१५	आवेशविधानम्	६८-७०
१६	बिषप्रयोगविधानम्	७१-७२
१७	विषापहारः	७३-७६
१८	विषमज्वरापहारः	७७-७८
१९	भूतनाशनम्	७९-८०
२०	ज्योतिर्दर्शनम्	८१-८२
२१	अञ्जनाधिकारः	८३
२२	चन्द्रज्योत्स्नाधिक्यम्	८४
२३	वन्ध्यापुत्रजन्म	८५-८६
२४	व्याघ्रदर्शनम्	८७
२५	मनुष्यदर्शनम्	८८
२६	वन्ध्याकरणम्	८९-९२
२७	लिङ्गवृद्धिदार्ढ्याधिकारः	९३-९६
२८	शुक्रस्तम्भनम्	९७-१००

२९	योनिशूलकरणमोक्षौ	१०१
३०	कुष्ठकरणम्	१०२
३१	काकघातोद्वेगः	१०३-१०४
३२	गोहननजीवनाधिकारः	१०५
३३	गर्भस्तम्भमोक्षणाधिकारः	१०६
३४	दीपनिर्वाणाधिकारः	१०७
३५	वृश्चिकविषापहारः	१०८-१११
३६	मेघादिजलस्तम्भाधिकारः	११२-११३
३७	पटान्तचित्रादर्शनम्	११४-११७
३८	प्रतिमाकर्षणम्	११८
३९	शङ्खशुक्त्याकर्षणम्	११९
४०	कुचनाशः	१२०
४१	भगसङ्कोचनाधिकारः	१२१-१२२
४२	भगरक्तप्रवाहः	१२३
४३	रात्रिमोहधूपः	१२४
४४	दीपेन काणीकरणम्	१२५
४५	अन्धीकरणबोधौ	१२६
४६	कलहनिधानम	१२७
४७	अन्तर्धानम्	१२८
४८	मृन्मयगजमदः	१२९
४९	द्रुमफलपुष्पाकर्षणम्	१३०
५०	फलपुष्पापादनम्	१३१
५१	दुग्धस्य घृतापादनम्	१३२
५२	जलस्य तक्रीकरणम्	१३३
५३	तक्रस्य दधिकरणम्	१३४
५४	मृतसञ्जीवनाधिकारः	१३५
५५	नारीपुरुषगुह्यबन्धमोक्षौ	१३६
५६	आसनबन्धः	१३७
५७	अन्धकारे ज्योतिर्दर्शनम्	१३८
५८	उपसंहारः	१३९-१४०

योगरत्नमाला

॥ श्रीगणेशाय नमः ॥

गुरुचरणकमलममलं प्रणम्य नागार्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्धयै वक्ष्येऽहं योगरत्नमालायाः ॥

इह शास्त्रारम्भे आचार्य्यनागार्ज्जुनपादाः शिष्टसमयपरिपालनार्थं शास्त्रस्योपादेयतां च दर्शयितुं गुरुपादनतिं कुर्वन्तः प्रथमामार्यामाहुः । विमलेति । विमला चासौ मतिश्चेति सैव किरणनिकरो दीप्ति—

विमलमतिकिरणनिकरप्रभिन्नसच्छिष्यकमलसंघाताः ।
सकलजगदेकदीपा जयन्ति गुरुभास्करा भुवने ॥ १ ॥

पुञ्जस्तेन प्रभिन्नाः प्रतिबोधिताः, सच्छिष्या एव कमलसंघाताः पद्मसमूहा यैस्ते तथा । सकलस्य कृत्स्नस्य जगतो लक्षणया समस्तलोकस्य ज्ञानावबोधाय दीपा दीपप्रायाः स्वगुरवो भास्कराः सूर्य्यतुल्याः भुवने लोके जयन्ति सर्वोत्कर्षेण वर्तन्त इत्यर्थः ।

स्पष्टाक्षरेति । स्पष्टाक्षराणि प्रकटवर्णानि यानि पदानि सुप्तिङन्तानि तान्येव सूत्राणि तैः । गुरूणां मतमभिप्रायः स एव रत्नाकरः, अनेकशास्त्राश्रितत्वात्समुद्रेणोपमानम् । तस्माद्रत्नाकरात्समुद्धृत्य ग्रथिता रचिता परिस्फुरन्ती उद्भासमाना योगा एव रत्नानि तेषां माला निगद्यते। यथाहि रत्नाकरात्केनचिद्रत्नान्युच्चित्य स्पष्टै र्व्यक्तैरक्षरैर—

स्पष्टाक्षरपदसूत्रैर्गुरुमतरत्नाकरात्समुद्धृत्य ।
ग्रथिता परिस्फुरन्ती निगद्यते योगरत्नमालेयम् ॥ २ ॥

त्रुटितैः पदैर्नायकमणिभिरुपलक्षितैः सूत्रैस्तन्तुभिर्ग्रथिता प्रोता दीप्ता प्रभासमाना रत्नमाला प्रकाश्यते एवमियमपि योगरत्नमाला श्रीनागार्ज्जुनाचार्येण परोपकाराय गुर्वभिप्रायसमुद्राद्विविधानि दृष्टप्रत्ययानि योगा एव रत्नानि उच्चित्योच्चित्य इहानीय योगरत्नमाला (यां) प्रकाश्यन्ते प्रकटीक्रियन्ते ॥ २॥ तेषु प्रथमं वश्यकर्म्मोच्यते ।

सितेति । सितो योऽसौ भानुविटपी अर्कस्तस्य मूलं श्वेतार्कमूलम् । मंजिष्ठा प्रसिद्धा। भवनचटककं गृहचटकशिरः। कुष्ठं रुक् एभिश्चतुर्भिरौषधैः श्लक्षणचूर्णितैः । स्वांगक्षतभवदिग्धैः स्वशंरीर—

सितभानुविटपिमूलं मंजिष्ठा भवनचटककं कुष्ठम् ।
स्वाङ्गक्षतभवदिग्धैस्त्रिभुवनमेभिर्वशीकुरुते ॥ ३ ॥

रक्तमिश्रितैः कृता रचिता गुटिका खाने पाने दत्ता त्रिभुवनमपि वशीकरोति किंपुनर्नरमेकम् । अत्र (अस्मिन्) शास्त्रे श्रीनागार्ज्जुनाचार्य्येण सर्वेऽप्यनुभूता एव योगा उक्ताः । अतो नाप्रामाण्यशंका कार्य्येति ॥ ३ ॥

योगान्तरमाह । तालेति । तालं हरितालं पिशाचभवने श्मशाने भूताह्नि कृष्णचतुर्दश्यां शवमुखे निवासितं—

तालं पिशाचभवने भूताह्नि प्रेतवदनपर्य्युषितम् ।
रोगेन्द्रसम्प्रयुक्तं त्रिभुवनवशकारकं तिलकम् ॥ ४ ॥

कुष्ठसहितं कृत्वा तेन कृतं तिलकं त्रिभुवनमपि वशयति । किमुत नरमात्रमिति भावः ॥ ४ ॥

योगान्तरमाह । मृतनरेति । मृतपुरुषस्य चक्षुषी जिह्वा ललाटं हृदयं नासा च, एभिः श्मशाने साधितं (पाचितं)

मृतनरलोचनलोलाललाटहृद्घ्राणसाधितं तैलम् ।
सकलनराधिपललनावशंकरं शंकरालये पुष्ये ॥ ५ ॥

तैलं पुष्यनक्षत्रे समस्तराजपत्नीनां वश्यकृद्भवति ॥ ५ ॥
किञ्च नरतैलेति ॥ नरतैलेन पुरुषवसया मृतवस्त्रवर्त्तिकया पुरुषकपाले रात्रौ अश्वत्थवृक्ष—

नरतैलनरकपाले प्रेताम्बरवर्त्तितः क्षपादीपात् ।
क्षोणीरुहेन्द्रशिखरे समुपात्तं कज्जलं जगद्वशकृत् ॥ ६ ॥

॥ इति वश्याधिकारः ॥

स्कन्धे दीपं प्रज्वाल्य कज्जलं ग्राह्यं तेनांजितनयनो यं यं पश्यति तं तं वशीकरोति ॥ ६ ॥

॥ इति वश्याधिकारः ॥

। अथ विद्वेषणाधिकारः ।

उरगेति । मयूरस्य शिरः कुक्कुटस्य शिरः आभ्यां धूपं कृत्वा यस्य कस्यचिद् भवने गृहे उद्ग्राह्यैतद्गृहनिवासिनां प्राणिनां प्रीतिमचिरेणायन्धूपवरो विनाशयत्येव—

उरगारिशिरोजनितो धूपवरस्ताम्रचूडशिरसा च ।
त्रिभुवनभवनेषु गतः क्षिप्रं प्रीतिं विनाशयति ॥ ७ ॥

नान्यथा । एतद्योगत्रयं कृष्णचतुर्दश्यां विशेषतो भौमवासरान्वितायां कार्य्यमिति ॥ ७ ॥

योगान्तरमाह । ऋतुमदिति । या दुर्भगा नारी तस्याः कुसुमगृहे योनौ ऋतुदिवसादारभ्य सप्तदिनानि श्वेत—

ऋतुमद्दुर्भगललनाकुसुमगृहे सप्तदिवसपर्य्युषितैः ।
सितसिद्धार्थैस्पृष्टस्त्रैलोक्ये को न याति विद्वेषम् ॥ ८ ॥

सर्षपान्प्रक्षिप्यानन्तरमाकृष्टैस्तैः (शुष्कैः) सर्षपै र्यो यः स्पृश्यते स स विद्वेषं याति ॥ ८ ॥

किञ्च द्विकेति । द्विकः काकः दिवसभीरुरुलूकस्तयोः पक्षाभ्यां नरेन्द्रमुख्यैः स्तंभकोत्तमैः (साधकोत्तमैः) प्रयोजितः कृतो

द्विकद्विवसभीरुपक्षप्रभवो धूपः प्रयोजितः प्रीतिम् ।
हन्यान्नरेन्द्रमुख्यैः सचराचरजन्तुजातस्य ॥ ९ ॥

धूपः स्थावरजङ्गमजन्तुजातस्य प्रणिमात्रस्य प्रीतिं विनाशयति ॥ ९॥

योगान्तरमाह । भुजगेन्द्रेति । भुजगेन्द्रः (भुजग)प्रधानं कृष्णसर्प्पस्तस्य कवचं कंचुकं तदुत्थो, भुजंगरिपुर्मयूर—

भुजगेन्द्रकवचजन्मा भुजंगरिपुपक्षभागसंयुक्तः ।
धूपः प्रयुक्तमात्रो विद्वेषकरस्त्रिलोकस्य ॥ १० ॥

॥ इति विद्वेषणाधिकारः ॥

स्तस्य पक्षश्च ॥ आभ्यां समभागाभ्यां कृतो धूपस्त्रैलोक्यस्यापि विद्वेषकृद् भवति ॥ १० ॥

॥ इति विद्वेषणाधिकारः ॥

। अथोच्चाटनम् ।

तुरगेति । कृष्णसर्पशिरः उन्मत्तकुक्कुटजिह्वया सार्द्धं एदद्वयमश्वखुराभ्यन्तरवर्त्तिनि

तुरगखुररन्ध्रनिहितं नागशिरो दक्षजिह्वया सहितम् ।
भवनद्वारि निखातं रिपुमुच्चाटयति सप्ताहात् ॥११॥

च्छिद्रे क्षिप्त्वा यस्य (रिपोः) गृहद्वारि (निखन्यते) सप्तभि (र्दिवसै) स्तं सगृहं रिपुं समुच्चाटयत्येव नान्यथा ॥ ११ ॥

योगान्तरमाह । हलिनीति । हलिनी लांगली प्रोक्ता पिप्पली चेति-कोशः । करिहारीति भाषया प्रसिद्धा । वराहवर्चः शूकरविष्ठा शवमूर्द्धजाः मृतककेशाः दीर्घकंधर उष्ट्रस्तस्यास्थीनि । एतानि चत्वारि एकत्रीकृत्य पूर्ववदेव ।

हलिनीवराहवर्च्चः शवमूर्द्धजदीर्घकन्धरास्थीनि ।
त्रिभुवनमपि योगवरः स्फुटमुच्चाटयति सप्ताहात् ॥१२॥

तुरगखुररन्ध्रे मेलयित्वा यस्य गृहद्वारि निखन्यते तस्य गृहं सप्तभिर्दिवसैरेष योगवरः समुच्चाटयतीति न त्रिभुवनमपि स्फुटमुच्चाटयतीत्यर्थः । १२ ॥

ध्यानयोगमाह । दण्डकरेति । दण्डकरो लगुडहस्तो योऽसौ पुरुषस्तेन चोदितः प्रेरितो हन्यमान इति यावत् । अत एव जवविचलितः जवाद् विशेषण चलितः शीघ्रगतिर्यो दीर्घकन्धर उष्ट्रस्तत्रारूढमेवंविधं पुरुषं

दण्डकरपुरुषचोदितजवविचलितदीर्घकन्धरारूढम् ।
सुरगुरुमपि सप्ताहाद्विचित्तमुच्चाटयेत्स्थानात् ॥१३॥

ध्यायन् सुरगुरुमपि बृहस्पतिमपि सप्ताहादुच्चाटयति किमुत सामान्यमात्रं नरमि (ति) । पूर्वयोगेन सहितोऽयं ध्यानयोगो ज्ञेयः ॥ १३ ॥

किञ्च । मृतकेति । यस्य पुरुषस्य गृहद्वारे पुरुषास्थिकीलको निखन्यते तस्य गृहं श्मशान—

१. शिरोन्मत्तद्विजिह्वया'

मृतकपुरुषास्थिशङ्कुर्भवनद्वारे निखन्यते यस्य ।
तस्य गृहं गतविभवं भयङ्करं भूतभवनाभम् ॥ १४ ॥

॥ इत्युच्चाटनाधिकारः ॥

सदृशमिति भयङ्करम्भवति शून्यं भवतीत्यर्थः ।

॥ इत्युच्चाटनाधिकारः ॥

। अथ दर्पणे रूपदर्शनम् ।

रक्तेति । रक्तकरवीरकुसुमं भल्लातकं अम्लवेतसञ्च एभिस्त्रिभि

रक्तहयमारकुसुमं भल्लातकमम्लवेतसममीभिः ।
तुरगखरदीर्घकन्धररूपं सम्मार्ज्य दर्पणं पश्येत् ॥ १५ ॥

रौषधैर्दर्पणं सम्मार्ज्य संशोध्य अश्वगर्दभोष्ट्ररूपाणि पश्येत् ॥ १५ ॥

किञ्च । हयेति । अश्ववृषभशूकरवानरगर्द्दभोष्ट्राणां करजैर्नखैः पुटाग्निदग्धैर्मण्डूकवसया

हयगोवराहवानरखरोष्ट्रकरजैः पुटाग्निना दग्धैः ।
दर्दुरवसाविमिश्रैस्तेषां रूपाणि पूर्ववत्पश्येत् ॥ १६ ॥

मिश्रैः पूर्ववदेव दर्पणं संमार्ज्य संशोध्य तेषामश्वादीनां रूपाणि दर्पणे पश्यति । अत्र गौर्वृषभः ॥ १६ ॥

किञ्च । अंकोल्लेति । अंकोल्ल[1]वृक्षबीजतैलेन दीपं कृत्वा कज्जलं संपाद्य गवां घृतेनालोड्य तेन कज्जलेन पुष्य-

अंकोल्लतैलकज्जलसुरभिक्षीरैर्दृगञ्जने पुष्ये ।
पश्यति दर्प्पणमध्ये रूपाणि भवान्तरे यानि ॥ १७ ॥

नक्षत्रे दृष्टिमञ्जयेत्—तेनाञ्जितनयनो जन्मान्तरे स्वकीयानि यानि रूपाणि स्थितानि तानि दर्प्पणे पश्यति ॥ १७ ॥

किञ्च । अञ्जितेति । तगरफलं चूर्णीकृत्य अङ्कोल्लवृक्षबीजतैलेना-लोड्य तेन तगरकल्केन चक्षुषी अञ्जयेत् । तेनाञ्जितनयनो मनुष्यो दिव्याकृतिं पुरुषं पश्यति । पुनः केवलतगरफलचूर्णा-

---

१. अंकोल[2]

अञ्जितनयनो मनुजः तगरफलाङ्कोल्लतैलकल्केन ।
पश्यति पुरुषन्दिव्यं प्रकृतिन्तगराञ्जनाद् व्रजति[1] ॥ १८ ॥

॥ इति दर्पणे रूपदर्शनाधिकारः ॥

ञ्जनादेव प्रकृतिं व्रजति दिव्यं पुरुषं न पश्यतीत्यर्थः ॥ १८ ॥

॥ इति दर्पणे रूपदर्शनाधिकारः ॥

। अथ चित्ररोदनान्तर्धानम् ।

ललनेति । जरायुर्गर्भपुटम् । ललनासंबंधिगर्भशय्याधूपात् भित्तिस्थं चित्रं लक्षणया भित्तिचित्रपुत्तली प्रत्यक्षं रोदिति । गुग्गुलुकृतधूपाच्च पुनरपि तच्चित्रं

ललनाजरायुधूपाच्चित्रं भित्तौ प्ररोदिति प्रकटम् ।
पुनरपि पुरुकृतधूपात्सर्व्वं प्रकृतिं भजत्याशु[2] ॥ १९ ॥

प्रकृतिं व्रजति तत्सर्वं स्वभावस्थमेव भवति झटिति रोदनान्निवर्त्तत इत्यर्थः ॥ १९ ॥

अपि च । वृषेति । मार्ज्जारीगर्भशय्या तथा प्रधानस्त्रीगर्भशय्या च एताभ्यां कृतधूपात् भित्तिस्थं चित्रं तद्गतपुत्तल्यादिकं किमपि न दृश्यते । पश्चात्तदेव सुवर्णमाहिषाख्यगुग्गुलुधूपेन

वृषदंशिवरपुरन्ध्रीजरायुधूपान्न दृश्यते भित्तौ ।
प्रकटत्वमेति भूयः कौशिकधूपेन धूपितं चित्रम् ॥ २० ॥

तिरोहितमपि चित्रं पुनरपि प्रकटत्वमेति स्वभावस्थमेव दृश्यते ॥२०॥

योगान्तरमाह । करभेति । करभ उष्ट्रस्तस्य कपोलप्रस्वेदमूत्रश्लेष्मभिर्बहुवारं भावितेन घृष्टेन तालेन हरितालेन करगर्भलेपात् हस्ततले लेपात् भित्तिगतानि चित्राणि नानाजातीयान्या

करभकपोलस्वेदैर्मूत्रकफैर्भावितेन तालेन ।
तेन करगर्भलेपाच्चित्राणि समाक्षिपत्याशु ॥ २१ ॥

---

१. भजति[2]

२. प्रकृतिं सर्वं व्रजत्याशु[3]

लेख्यानि तद्गतपुत्तल्यादीनि हस्तस्पर्शादेव क्षिप्रमाकर्षयति नान्यथा ॥ २१ ॥

किञ्च । सरमेति । सरमा शुनी तस्याः जरायुः गर्भशय्या तस्या धूपेन धूपितं यत्किंचिद्वेष्टितं पुच्छादि पुच्छमयकूर्चादि तेन सव्येन दक्षिणेन भ्रामितेन चित्रवर्णप्रभृतीनि चित्रस्य वर्णाश्चित्रवर्णास्त—

सरमाजरायुधूपितवेष्टितपुच्छादिना हरेद् भ्रमणात् ।
सव्येन चित्रवर्णप्रभृतीन्यपसव्यतो मोक्षः ॥ २२ ॥

॥ इति चित्रान्तर्धानम् ॥

त्प्रभृतीनि । यद्वा चित्रवर्णा नानाविधाक्षराणि हरेदाकर्षयेत् ॥ वामतो भ्रमणात्तेषां हृतानामपि सतां मोक्षः प्रकटीकरणं भवतीत्यर्थः ॥२२॥

॥ इति पुत्तलीहरणम् ॥

। अथ पुरुषान्तर्धानम् ।

स्रोत इति । स्रोतः स्रोतोऽञ्जनं रसाञ्जनमिति केचित् , सुरमा रसवतेति वा भाषया । शशाङ्ककण्टकं शैवालकण्टकम्, मधु माक्षिकं, मधुकं मधुयष्टी जेठीमध्विति भाषया । प्रथमकुसुमम् प्रथमरजस्वलायाः कन्यायाः शोणितम् । नवहलिनी प्रत्यग्रलाङ्गली करिहारी

स्रोतः शशाङ्ककण्टकमधुमधुकप्रथमकुसुमसंयुक्ता ।
नवहलिनीकेसरजा गूहति गुटिका त्रिलोहगर्भस्था ॥ २३ ॥

तस्याः केसराणि च एतैरौषधैः गुटिका कार्या । ततः सा त्रिलोहगर्भस्था सुवर्णरौप्यताम्रमध्ये स्थापिता कण्ठे बद्धा सती गूहति पुरुषमिति शेषः । पुरुषान्तर्धानकरी भवतीत्यर्थः ॥ २३ ॥

किञ्च । नीलेति । नीलवर्णाशोकाङ्कुरचुर्णं हरिणरक्तेन सप्तधा भावितङ्कृत्वा सुवर्णरजतताम्रै

नीलाशोकभवाङ्कुरमेणकरक्तेन सप्तधाभ्यक्तम् ।
लोहत्रयगर्भगतं गूहति वक्त्रस्थितञ्जगदशेषम् ॥ २४ ॥

रावेष्टितं मुखे क्षिप्तं समस्तस्यापि जगतोऽन्तर्धानं करोति किमुतैकस्य पुरुषमात्रस्येत्यर्थः ॥ २४ ॥

तगरस्योत्तरमूलं दिग्वसनेनोद्धृतं शशिग्रहणे ।
रविचन्द्रवह्निमध्यगमदृश्यकरमानने क्षिप्तम् ॥ २५ ॥

योगान्तरमाह । तगरेति । सोमग्रहणे नग्नो भूत्वा तगरस्योत्तरदिक्प्रसृतं मूलं त्रिलोहवेष्टितं कृत्वा यो यः पुमान् मुखे धारयति स स अदृश्यो भवतीति ॥ २५ ॥

किञ्च । गोरोचनेति । गोरोचना प्रसिद्धा इङ्गुदीतरुकुसुमं इङ्गुवावृक्षपुष्पम् । अथ च उद्बन्धनेन या मृता नारी तस्या अक्षिरोमाणि पक्ष्माणि । द्विकः काकस्तेन भुक्तं यदन्नं ततो यदुच्छिष्टमन्न—

गोरोचनेङ्गुदीतरुकुसुममृतोद्बन्धिताक्षिरोमाणि ।
द्विकभुक्तोच्छिष्टयुता गुटिकेयं कल्पललनाख्या ॥ २६ ॥

मेतान्यौषधानि एकीकृत्य गुटिका कार्या । सा पूर्ववत् त्रिलोहगता मुखेक्षिप्ता सती पुरुषमदृश्यं करोति । इयङ्गुटिका कल्पललनेति नागार्ज्जुनकल्पप्रसिद्धा ॥ २६ ॥

योगान्तरमाह । पितृवनेति ॥ पितृवने श्मशाने प्रथमरजस्वलायाः कन्याया रजः मनःशिलायुक्तं मर्द्दितं सत् ललाटतटे तेन तिलकक्रियया त्रिभुवनमपि विनिगूहति किमुत नरमात्रम् । अयमर्थः श्मशाने—

पितृवनमर्द्दितमृतुमत्कन्यारेतो मनःशिलायुक्तम् ।
त्रिभुवनमपि विनिगूहति तिलकक्रियया ललाटतटे ॥ २७ ॥

मनःशिलां नारीप्रथमपुष्पेण मर्द्दयित्वा तया ललाटे कृततिलकः पुमानदृश्यो भवतीति ॥ २७ ॥

किञ्च नीलेति । नीलश्चासावशोकवृक्षस्तस्योत्तरदिशि या शाखा तत्र भवं यद् वायसनीडं तत्र प्रादुर्भूता येऽङ्कुराः कोमलशिफा (खा) स्तैश्चूर्णितैः गोरोचनमिश्रितैः ललाटपट्टे कृततिलकः सचराचरं

नीलशोकोत्तरदिग्वायसनीडांकुरैः कृतस्तिलकः ।
गूहति ललाटपट्टे मनुजं सचराचरस्यास्य ॥ २८ ॥

स्थावरजंगमात्मकं सकलं लोकं गूहति अन्तर्हितं करोति किमुत नरमात्रमित्यर्थः ॥ २८ ॥

योगान्तरमाह। पारावतेति। पारावतः कपोतस्तत्रापि ग्रीवायां कृष्णरेखस्तस्य कुक्षौ स्रोतोऽञ्जनं सुरमां क्षिप्त्वा उपरि मृत्तिकान्दत्वा चितागनौ पुटपाकरूपेण पाच्यते यावन्मृत्तिकाग्निवर्णा भवति तत

पारावतस्य कुक्षौ स्रोतश्चितिकानले पुटे पक्वम्[1]।
सिद्धाञ्जनं निगूहति त्वसितबिडालास्रनिर्वाणम्॥ २९॥

स्तन्मध्यात्स्रोतोऽञ्जनं पक्वं सत् सिद्धाञ्जनसंज्ञकं भवति। तद् गृहीत्वा-चक्षुषी अञ्जयेत् अदृश्यो भवति। ततश्च कृष्णमार्ज्जाररुधिरेण चक्षुषी पुनरप्यञ्जयेत् निर्वाणं मोक्षो भवति दृश्यो भवतीत्यर्थः॥ २९॥

किञ्च। नवेति। नवाश्च ते धनास्तृणाङ्कुराश्च तैरुद्धृता या मृत् तेषामुपरिस्थिता या मृत्तिका सैका। मधु माक्षिकं, हरितालं च त्रयमेतन् पुष्यनक्षत्रे मेलयित्वा ललाटदेशे तिलककरणात् सिद्धेभ्योऽपि—

नवघनतृणाङ्कुरोद्धृतमृन्मधुहरितालमिश्रिता पुष्ये।
सिद्धेभ्योऽपि निगूहति ललाटतटपट्टतिलककरणेन[2]॥ ३०॥

॥ इत्यदृशीकरणाधिकारः॥

निगूहति किमुतान्यमानुषेभ्य इत्यर्थः॥ ३०॥

॥ इत्यदृशीकरणाधिकारः॥

। अथकु(कौ)तूहलानि[3]।

भ्रमरेति। सारेण मध्यभागस्थस्थिरांशेन रहितो योऽसावंघ्रिपोद्भवः शंकुः अंतःसुषिरो योऽसौ वृक्षकीलको जीवद्भ्रमरपरिपूर्णगर्भः जीवद्भ्रमरैः सम्यक्परिपूरितं गर्भमन्तः सुषिरप्रदेशो यस्य सः—

भ्रमरपरिपूर्णगर्भस्तिष्ठत्याकाशमण्डले निहितः।
साररहिताङ्घ्रिपोद्भवशंकुः प्रकरोति विस्मयं लोके॥३१॥

तथाविधः शंकुराकाशे प्रक्षिप्तः सन्नाकाश एवावतिष्ठेत्। लोकस्य

---

१. नलेन पुटपक्वम्[2,3]

२. ललाटपट्टतिलककरणेन[3]

३. कौतुकम्[3]

विस्मयस्त्वदृष्टदर्शनात् । निर्ज्जीवस्याकाशे कथमवस्थानं भवतीति विस्मयः ।।

योगान्तरमाह । विद्युदिति । आर्द्रेण सद्यःप्रसूतशुनीजरायुणा मरिचपिप्पलीशुण्ठीचूर्णसहितेन लिप्तो योऽसौ शंकुर्विद्युद्दग्धवृक्षकीलकः स एवंविध आकाशे क्षिप्तः सन् आकाश एव बहुकालं

विद्युद्विदग्धपादपशंकुः[1] सरमाजरायुणार्द्रेण ।
त्रिकटुकयुतेन लिप्तो दशांगुलोऽवतिष्ठते व्योम्नि ॥ ३२ ॥

यावदभिव्याप्य दशाङ्गुलो दशांगुलप्रमाणोऽवतिष्ठते अवस्थानमेवाश्चर्यमिति ।। ३२ ।।

किञ्च । सरमेति । सरमाजरायुः शुनीगर्भशय्या तया कृता या हस्ताङ्गुलिमुद्रिका तस्याः प्रभावेन निरवलंबनं यथा स्यादेवमाकाशे क्षिप्तं कमलमवतिष्ठते । तन्मुद्रिकास्पृष्टाङ्गुली—

सरमाजरायुनिर्मितपाणिलतामुद्रिकाप्रभावेन ।
आलम्बननिरपेक्षं तिष्ठत्यम्भोरुहं गगने ॥ ३३ ॥

स्पर्शात्कमलमाकाशे क्षिप्तमाकाशान्न पततीत्यर्थः ।। ३३ ।।

स्तब्धेति । स्तब्धा श्रावणिका मुण्डीति प्रसिद्धा । वोडीकह्लारीति भाषया । तस्याः बीजहोमात् वितानसञ्छादितेऽम्बरे वह्नौ अग्नौ आवृतार्कदर्शनाकाशे चन्द्रातपे ज्योत्स्नायामे(मि)व कार्यम् । किं भवत्यनेने—

स्तब्धाख्यबीजहोमाद्वितानसञ्छादितेऽम्बरे वह्नौ ।
चन्द्रातपे विलग्ना दृश्यन्ते शूलपाणयो रुद्राः ॥ ३४ ॥

त्याह । दृश्यन्ते शूलपाणयो रुद्राः एवं कृते शूलधरा ईश्वरमूर्त्तयो दृश्यन्ते ।। ३४ ।।

कुर्विति । कुरु निष्पादपदहनस्य प्रज्वलनमित्यन्वयः ।। समिदसारदारुणि समिद्भूते असारकाष्ठे कथंभूते गंधक्यंकोल्हतैलसंलिप्ते गंधकी गंधकः गंधपाषाणेति **पर्य्यायः** । अंकोल्हतैलं च ताभ्यां

१. वज्रशिखिदग्धपादपशंकुः[2]

कुरु समिदसारदारुणि गंधकयंकोल्हतैलसंलिप्ते ।
तप्तघृतसूतहवनात् प्रज्वलनं भवति दहनस्य ॥ ३५ ॥

प्रलिप्ते तप्तघृतसूतहवनात् तप्तं घृतं तप्ताश्चितं सूतं पारदश्च तयोर्हवनात्प्रज्वलनं भवतीत्यर्थः ॥ ३५ ॥

एवमिति । पूर्वोक्तार्यायामसारदारुणि गंधकाश्मांकोल्हतैलंसलिप्ते एवंविधेन्धने वर्तमानो गंधपाषाणसंभवो रेणुः तप्ताज्याहुतिहोमात् तप्तघृतप्रक्षेपादेव शीघ्रमग्निं प्रज्वालयति—

एवंविधेन्धनस्थो गन्धकपाषाणसंभवो रेणुः ।
तप्ताज्याहुतिहोमाज्झटिति प्रज्वालयत्यनलम् ॥ ३६ ॥

कल्माषिकेति । वज्रानलेन वैद्युतेन वह्निना दग्धो यः पादपस्तथाविधेऽरण्ये याः कल्माषिकाः अंगारिकाः कोइलेति भाषया प्रसिद्धास्ताभिरेव विमर्द्दितं कृतं पूर्वसदृशमिन्धनं अनन्तरं च पूर्वयोगवत्—

कल्माषिकाविमर्द्दितवज्रानलदग्धपादपेऽरण्ये ।
ज्वलति नितान्तं जनितो जलहवनाद्वैद्युतो वह्निः ॥ ३७ ॥

समिदसारदारुणि गन्धकाश्माङ्कोल्लतैलसंलिप्ते इन्धने तस्मिन् जलहवनात्पानीयहोमात् नितान्तं जनितो वैद्युतोऽग्निर्ज्वलति । जलहोमादाश्चर्यमिति भावः ॥ ३७ ॥

ऋतुमदिति । ऋतुमती चासौ ललना च तस्या योनौ कुसुमगृहे । सप्तदिनान्यवधीकृत्य आवासितं स्थापितं सौवीरकं कर्त्तृ क्रमात् सिद्धं गुरुपरंपरया सिद्धं हवनाद्धेतोर्वह्निमध्ये प्रकटयति दर्शयति—

ऋतुमल्ललनायोनौ सप्तदिनावासितं क्रमात्सिद्धम् ।
प्रकटयति वह्निमध्ये हवनात्सौवीरकं पुरुषम् ॥३८॥

॥ इति कुतूहलाधिकारः ॥

अग्निकुण्डमध्ये एवंविधसौवीराञ्जनहवनात् तादृशपुरुषरूपं दश्यते इत्यर्थः ॥ ३८ ॥

॥ इति कौतुकानि ॥

। अथाग्निस्तंभः ।

शशिजेति ।। शशिजं शैवालं जलौकादर्दुरौ प्रसिद्धौ जीवविशेषो । पाटलाया वृक्षविशेषस्य मूलानि च । एभिरौषधैस्तैलं पक्वं कृत्वा तेन तैलेन चरणतलसंप्रलेपात् हेतोरंगारखानिकामध्ये यथेष्टं नरः परिभ्रमति ।। अंगारपरिपूर्णगर्तमध्ये साधको भ्रमति न दह्यत इत्यर्थः ।। ३९ ।।

शशिजजलौकादर्दुरतैलैरेभिः सपाटलामूलैः ।
चरणतलसंप्रलेपाद् भ्रमति नरोऽङ्गारखानिकामध्ये ।।३९।।

किञ्च । भेकेति । मंडूकवसामध्ये मुण्डी जलौका शैवालं च प्रक्षिप्य तेन करचरणादिकं प्रलिप्य ततोऽग्नेरुपरि भ्रमतो न दाहस्फोटादिकं भवति हिमशीतलस्तस्य साधकस्य वह्निर्भवतीत्यर्थः ।।४०।।

भेकवसा श्रवणिकया[1] जलौकसा चन्द्रसंभवैर्युक्ता ।
करचरणसंप्रलेपात् करोति हिमशीतलं वह्निम् ।। ४० ।।

जाठराग्निस्तंभमाह । धवलेति । धवलमंडूकचूर्णं तस्यैव धवलस्यैव मण्डूकस्य रुधिरेण बहुशो भावितं कृत्वा अग्नौ प्रक्षिप्य तेनाग्निना पक्वमन्नादिकं भक्षयितुराहारपाकं स्तम्भितोऽग्निर्न—

धवलप्लवंगसोद्भवरेणुं रुधिरेण रञ्जयेत्तस्य ।
न पचति वर्षशतैरपि विभावसुः स्तंभितस्तेन ।। ४१ ।।

करोतीत्यर्थः ।। ४१ ।।
श्री नागार्ज्जुनप्रसादादेव योगः साधकानां फलतु ।। ४१ ।।

अथ प्राकृताग्निस्तंभमाह । तुरगेति । नलवेतसवृक्षमूलम् । माषयवौ धान्यविशेषौ । भेको मंडूकः एतैरश्वखुररंध्रे मासत्रयं यावत् प्रक्षिप्तैः पश्चादुद्दीपितोऽप्यनल एभिरौषधैः स्तंभितः सन्साधकस्य—

तुरगखुररन्ध्रनिहितैर्नलवेतसमूलमाषयवभेकैः ।
न दहति रोमापि मनाक् स्तंभित एतैः प्रदीपितोऽप्यनलः ।।४२।।

।। इत्यग्निस्तम्भः ।।

---

१. श्रावणिका[1];[2]

रोममात्रमपि न दहति किमुत नरमित्यर्थः ।

॥ इत्यग्निस्तंभाधिकारः ॥

। अथ जलस्तंभः ।

प्रक्षिप्येति । डण्डुभो द्विमुखः सर्पस्तस्य रक्तं कुत्रचित्पटान्तरे कृत्वा मुखमध्ये—

प्रक्षिप्य वदनमध्ये डुण्डुभरक्तं प्रविश्य जलमध्ये ।
निजभवनाभ्यन्तर इव तिष्ठेदात्मेच्छया धीमान् ॥ ४३ ॥

प्रक्षिप्य पानीयमध्ये प्रविष्टः सन् स्वीयगृहमध्यगत इव सुखेन तिष्ठति जलेन न प्लाव्यते । जलं स्तंभयतीत्यर्थः ॥ ४२ ॥

किञ्च । स्योनाकेति । स्योनाकबीजचूर्णं अरलुवृक्षबीजैः । स्योनाकः पृथुशिम्बः स्यात् शुकनाशः कुटन्नटः । भूतवृक्षश्च कट्वंगष्टुण्टुकः सल्लकोऽरलुरिति द्रव्यगुणः । चूर्णं कृत्वा पादुकाद्वयं तदारूढः—

स्योनाकबीजचूर्णं कृत्वा चाक्रम्य पादुकायुगलम् ।
मह्यामिव सलिलोपरि पर्य्यटति नरः सुविस्पष्टम् ॥ ४४ ॥

भूमाविव पानीयोपरि प्रकटं यथा स्यादेवं संचरति । पुर्ववज्जलं स्तंभयतीत्यर्थः ॥ ४४ ॥

नवनीतेति । नवनीतसुवर्णगैरिके प्रसिद्धे । दुर्गन्धा ओषधिविशेषः, वचोग्रगंवेतिपर्य्याया[1] । एतेषां—

नवनीतरुक्मगैरिकदुर्गन्धामीनतैलकल्केन ।
सकलस्रोतोऽभ्यंगाद् भ्रमति नरो नक्रवत्सलिले ॥ ४५ ॥

चूर्णकल्केन मत्स्यतैलसहितेन शरीरसक्तानि सर्वाणि स्रोतांसि मुखादीनि रंध्राण्यभ्यज्य ततो मत्स्य इव जलोपरि भ्रमति जले त्लवते इत्यर्थः ॥ ४५ ॥

योगान्तरमाह । गोगवलेति । बिल्वफलं मदनफलञ्च । एते गोक्षीरेण पिष्ट्वा मर्द्दयित्वा गुटिकां कृत्वा गोश्रृंगमध्यस्थितसुषिरप्रदेशे प्रक्षिप्य सप्तदिनानि यावत्तत्र तां धारयित्वा पश्चात् तत आकृष्य यानपात्र—

१. Absent in Ms. 2'3

गोगवलरन्ध्रनिहितैः श्रीफलकामाङ्घ्रिपैः पयःपिष्टैः ।
स्तम्भयति यानपात्रं नावान्तररन्ध्रगा गुटिका ॥ ४६ ॥

॥ इति जलस्तम्भः ॥

रन्ध्रेषु नावादिरंध्रेषु क्षिप्ता गुटिका नावादिकं स्तंभयति। नावादिस्तंभनं तु जलस्तंभनाद्भवति । अतोऽनेन योगेन जलं स्तभ्यते । अतोजलस्तंभनान्नावादीनां स्तंभनमुचितमितिभावः ॥ ४६ ॥

श्रीनागार्ज्जुनप्रसादादेव योगः फलतु साधकानाम् ॥
॥ इति जलस्तम्भः ॥

। अथ पिशाचीकरणम् ।

बीजानीति । वत्तूरफलबीजचूर्णम् । शुष्ककाष्ठांतरचारी कृमिर्घुणस्तस्य चूर्णम् । स्थूला नीला मक्षिकाः कोकिलास्तासां चूर्णञ्च एतान्यौषधान्येकीकृत्य पाने दत्तानि नरं पिशाचं कुर्वन्ति

बीजानि काञ्चनतरोर्घुणचूर्णयुतानि कोकिलाभिश्च ।
कुर्वन्ति नरं प्रेतं प्रत्यानयनं गुडारनालाभ्याम् ॥४७॥

ग्रहगृहीतमिव कुर्वन्तीत्यर्थः । तथैवैष दोषो गुडेन काञ्जिकामिश्रेणपीतेनोपशाम्यति । एतदौषधपानात्पुनरपि प्रत्यानयनं भवति सुस्थो भवतीत्यर्थः ॥ ४७ ॥

ब्राह्मणेति । ब्राह्मणादीनां नकुलान्तानां षण्णामेतेषां रोमाणि । विरमो मार्ज्जारस्तस्य वर्च्चं विष्ठादिभिः—

ब्राह्मणविडालवानरचण्डालोलूकनकुलरोमाणि ।
पिष्टानि विरमवर्चैरुन्मादकराणि सर्वलोकानाम् ॥ ४८ ॥

सह पिष्टानि चूर्णितानि एतान्यौषधानि खाने पाने च प्रदत्तानि सर्व लोकानामुन्मादकराणि उन्मादमुत्पादयन्तीत्यर्थः ॥ ४८ ॥

योगान्तरमाह । गोमायोरिति । गोमायुः शृगालस्तस्य लांगूलं पुच्छम् । ध्विकः काकस्तस्य दक्षिणभाग—

गोमायोर्लाङ्गूलं ध्विकदक्षिणभागपक्षसंयुक्तम् ।
शयनन्यस्तं विसृजति घोरं शत्रोरपस्मारम् ॥ ४९ ॥

स्थितं पक्षश्च एतद्द्वयं मेलयित्वा यस्य नरस्य शयने न्यस्यते स च रौद्रेणापस्मारेण गृह्यते स शत्रुरपस्मारग्रस्तो भवतीत्यर्थः ॥ ४९ ॥

किञ्च । कनकेति । कनकं धत्तूरं, आलं हरितालं, मातुलुंगं बीजपूरञ्च, पारावत-मयूर-कुक्कुटानां शकृत् विष्ठा चेति षडौषधानि । एकत्र चूर्णयित्वा यस्य खाने पाने च दीयते शिरसि वा चूर्णं प्रक्षिप्यते, स उन्मत्तो—

कनकालमातुलुंगैः पारावतकेकिताम्रचूडानाम् ।
शकृदुन्मत्तं कुरुते विमदः केशान्तकर्मणा भवति ॥५०॥

॥ इति पिशाचीकरणम् ॥

भवति । पश्चात्केशान्तकर्मणा शिरोमुंडनेन विमदो भवति । स्वस्थो भवतीत्यर्थः ॥ ५० ॥

॥ इति पिशाचीकरणम् ॥

श्रीनागार्ज्जुनाचार्य्यचरणाप्तप्रसादात् सफलो योगोऽयमास्ताम् ।

। अथ लोमशातनम् ।

हालाहलेति । कृष्णसर्प्पपुच्छं सप्तदिनानि यावद्धतूरकतैलमध्ये परिवासितं सत्—

हालाहललाङ्गूलं सप्तदिनं कनकतैलपर्य्युषितम् ।
शातयति केशनिवहं तथ्यमिदं रोमशातनं प्रवरम् ॥५१॥

रोमकेशादिकं शातयति । अनेन तैलेनाभ्यक्तं रोमकेशादिकं स्वयमेव पतति । अत एव तथ्यं सत्यं प्रवरं प्रधानं रोमशातनमेतत् ॥ ५१ ॥

योगान्तरमाह । बहुश इति । बहुशो बहुवारान् वज्री स्नुही थोहरीति भाषया । तस्या दुग्धेन तिलान्भावयित्वा तेभ्यस्तैलं गृहीत्वा तेन तैलेन केशा अभ्यज्यन्ते केशाः श्वेतवर्णा भवन्ति । परं शरीरस्याभ्यङ्गो न—

बहुशो वज्रीपयसा भावितातिलतैलमूर्द्धजाभ्यङ्गात् ।
धवलवलाहकरुचयो भवन्ति केशा[2] विनाभ्यंगात् ॥५२॥

---

१. केश[2] २. गात्र[1]

२ यो०

कार्य्यः । यतस्तेन तैलेन शरीरेऽभ्यक्ते शरीरं पाण्डुरं भवतीति सकुष्ठमिव प्रतिभासते । यदि वा शत्रोरंगं तथा चिकीर्षति तदा केनचिदुपायेन तत्तैलेन तदीयमङ्गमभ्यञ्जनीयमिति ॥ ५२ ॥

योगान्तरमाह ॥ अष्टमभाग इति । सुधा प्रसिद्धा चूर्णमित्यर्थः ॥ तस्या भागाः सप्त । आलं हरितालं तस्य भाग एकः । एतद्द्वयमेकत्रीकृत्य मेलयित्वा जलेनालोडयित्वा वैश्वानरे तापो देयः । पश्चा—

अष्टमभागालयुता सुधा जलालोडितानले तप्ता ।
शातयति केशजालं युक्ता सचराचरे जगति ॥ ५३ ॥

त्तेन स्वाङ्गशीतलेन कवोष्णेन केशजालमभ्यज्यते ततस्तत्केशजालं स्वयमेव नश्यति अनेन विधिना हरितालप्रयुक्ता सुधा केशसमूहं शातयति । एतत्सचराचरे जगति प्रसिद्धं लोमशातनमित्यर्थः ॥ ५३ ॥

किञ्च । सैन्धवेति । सैन्धवं लवणं, हरितालं, सुधा सुप्रसिद्धा चूर्णमित्यर्थः । यवनालक्षारः यवक्षारः । एतानि—

सैन्धव-हरिताल-सुधा-यवनालक्षारसंयुतो योगः ।
कुरुते रोमविहीनं प्रयुक्तमात्रस्त्रिलोकमपि ॥ ५४ ॥

॥ इति लोमशातनम् ॥

चत्वार्यौषधानि मेलयित्वा केशेष्वभ्यङ्गः कार्यः। एष योगस्त्रिलोकमपि केशविहीनं रोमविहीनञ्च करोतीत्यर्थः ॥ ५४ ॥

॥ इति लोमशातनप्रकारः ॥

अथ शस्त्रस्तंभः। प्रक्षिप्येति। अहिंसा शरपुंखा तस्या उत्तरदिग्भवं मूलं वदने क्षिप्त्वा यावत्केनापि—

। अथ शस्त्रस्तंभः ।

प्रक्षिप्य वदनमध्ये मूलमहिंसोत्तरं सदा समरे ।
न भिनत्ति शस्त्रमंगं तूष्णीं संतिष्ठते यावत् ॥ ५५ ॥

सह न वदति मौनेनावतिष्ठते तावत्तस्य शरीरे समरे सर्वदा सर्वथा महासि[१]र्न लगतीत्यर्थः ॥ ५५ ॥

---

१. प्रहारो[२]

दिवसेति। आदित्यग्रहणे कृष्णचतुर्दश्यां वा, आदित्यवारे पुष्य नक्षत्रे वा पाटलामूलमुत्पाट्य—

दिवसकरस्य ग्रहणेऽसितभूतायाश्च[1] पाटलामूलम्।
रविवारे पुष्यदिने वदनगतं खड्गवारणं कुरुते ॥ ५६ ॥

मुखे विधृतं सत् खड्गं स्तंभयति, खड्गादिघातः शरीरे न लगतीत्यर्थः। पाटला पुष्पजातीयो वृक्षविशेषः ॥ ५६ ॥

पर्ण्यप्यनेन विधिना समाहृता वदनमध्यनिक्षिप्ता।
शरवर्षं निपतन्तं संग्रामे[2] वारयत्याशु ॥ ५७ ॥

योगान्तरमाह। पर्ण्यप्यनेन विधिनेति। अनेन विधिना दिवसकरग्रहणे कृष्णचतुर्दश्यामादित्यवासरे पुष्यनक्षत्रे चेति पूर्वोक्तेन विधिना। पर्णी शालपर्णी ओषधिः, तस्याः मूलमुत्खातं मुखे क्षिप्तं सत् संग्राममध्ये निपतन्तं शरवर्षं धोरणीवर्षं शीघ्रं वारयति संग्रामे शराः शरीरं न भिन्दन्तीत्यर्थः ॥ ५७ ॥

सवितरीति। त्रीन्दिवसान् यावदुपवासं कृत्वा माघत्रयोदश्यां अस्तङ्गच्छत्यादित्ये विधिवन्मंत्र—

सवितरि शस्त्रस्तंभं प्रलंबमाने करोति हयगन्धा।
त्रिदिनोषितेन पीता विधिवन्माघत्रयोदश्याम् ॥ ५८ ॥

रक्षादिकं विधाय अश्वगन्धा पीता सती शस्त्रस्तंभं करोत्येव नान्यथा ॥ ५८ ॥

॥ इति शस्त्रस्तंभाधिकारः ॥

सितेति। सितभृंगः सितभृंगराजः। श्वेतकोकिलेक्षणः। श्वेतकाकजंघा। पुंखा श्वेतशरपुंखा। एतासामोषधीनां शिफा मूलं ह्रीबीजं बालकबीजं ककही[3]—एभिरौषधैः कटिबद्धैर्वायुरिव भूमिं भ्रमतियथा—

---

१. दिवसकरग्रहणेऽसितभूतेऽह्न्युत्पाट्य[2]

२. समरे शरभरवर्षं निपतन्तं[2]   ३. Absent in २-३

। अथ देशान्तरगमनम् ।

सितभृंगकोकिलेक्षण-जंघापुंखाशिफाभि[1] ह्रीबीजम् ।
कटितटबद्धैरेभिः समीरवन्मेदिनीं भ्रमति ॥५९॥

वायुः पटुर्गमने[2] एवं साधकोऽपि कटितटबद्धैरेभिरौषधैः भ्रमतीत्यर्थः ।·सितशब्दः सर्वत्र संबध्यते ॥ ५९ ॥

मदनफलेति । मदनफलम् । श्वेतकाकजंघा । भूर्ज्जवृक्षत्वक् च । एकवर्णसुरभेः क्षीरं तस्मिन्नेतदौषधत्रयं—

मदनफलं सितजंघा क्षीरं सुरभेस्तथैकवर्णायाः ।
भूर्ज्जत्वक्पदलेपाद्योजनशतकं गतश्रमो गच्छेत् ॥ ६० ॥

वर्त्तयित्वा पादतलद्वयं लेपनीयम् । श्रमरहितो दिनैकेन योजनशतं साधको गच्छति ॥ ५० ॥

किञ्च । कृकलासेति । कृकलासः प्रसिद्धः । नक्तमालक उलूकस्तयोः कंकालाः शरीरास्थीनि । सुरेन्द्रगोपः कृमिविशेषः, शिखी मयूर एतयोः रुधिरञ्च । एतैरौषधैः कृता गुटिका सुवर्णमध्ये निक्षिप्ता—

कृकलासनक्तमालककंकाल-सुरेन्द्रगोपशिखिरक्तैः ।
नयति गुटिकार्द्धयुक्तं शतत्रयं हेमगर्भस्था ॥६१॥

पश्चान्मुखे क्षिप्ता सती योजनानां सार्द्धत्रीणि शतानि नयति साधकमिति शेषः । इमां गुटिकां मुखे क्षिप्त्वा श्रमरहितः साधकः सार्द्धशतत्रयं योजनानामेवैतेन गच्छतीत्यर्थः ॥ ६१ ॥

सितेति । सितवंशा शुक्लवंशरोचना । आहकः श्वेतभृंगराज[3] स्तन्मूलानि च । एतैः श्लक्ष्णचूर्णितैश्छागलनवनीतेन पुष्यनक्षत्रे पाचितैः चरणतलप्रलेपाद्यथेप्सितं पंथानं साधकः प्रतिदिनं गच्छति ।

सितवंशाहकमूलैश्छागलनवनीतपाचितैः पुष्ये ।
चरणतलसंप्रलेपात्कामितमध्वानमुपयाति ॥ ६२ ॥

॥ इति देशान्तरगमनम् ॥

---

१. पुंखाभि[2] २. पद्रुगमनः[3]

एतल्लेपप्रभावेन वाञ्छितानि योजनानि गच्छतीत्यर्थः[1] ॥ ६२ ॥

॥ इति देशान्तरगमनम् ॥

अथाकालग्रहणदर्शनम् । अंकोल्लेति । अंकोल्लबीजतैलम् , मयूरपित्तम् , भल्लातकबीजं च भेला इति भाषया ।

। अथाकालग्रहणम् ।

अंकोल्लतैलयुक्तं शिखिपित्तारुष्करं तथा बीजम् ।
एभिर्द्दर्प्पणलेपाद् ग्रहणमकालेऽपि दृश्यते भानोः ॥६३॥

एतानि त्रीण्यौषधानि मेलयित्वा एतैर्द्दर्पणतलं लेपयेत् । अकाल एव सूर्यग्रहणं लोके दृश्यते ॥ ६३ ॥

रवीति । रविविषये आदित्यसन्निधौ । दर्प्पणम् आदर्शतलम् । शिखंडिनो मयूरस्य पित्तेन यद् यस्मात्—

रविविषयदर्प्पणतलं विलिप्यते यच्छिखण्डिपित्तेन ।
तद्योजनान्तरस्थः पश्यति लोको दिवाकरग्रहणम् ॥६४॥

कारणाद्विलिप्यते तत्तस्मादेव हेतोर्योजनान्तरस्थितो लोके आदित्यग्रहणं पश्यति किमुत निकटस्थः । अनेन योगसामर्थ्यं दर्शितं भवति ॥ ६४ ॥

योगान्तरमाह । मुनीति । मुनीनां वृक्षो मुनिवृक्षः पलाशस्तस्य पुष्पाणां सलिलं रसः । स्रोतोञ्जनं प्रसिद्धम्—

मुनिवृक्षकुसुमसलिलैः स्रोतोञ्जनचूर्णनिर्मितं पुष्ये ।
दर्शयति दिवैव जवतो नक्षत्रगणं दृगंजनं पुंसाम् ॥ ६५ ॥

रसाञ्जनमित्येके । तत्स्रोतोञ्जनं चूर्णीकृत्य पलाशपुष्परसेन भावयित्वा चक्षुष्यञ्जयेत् । ततो वेगतो झटिति दिवस एव नक्षत्रसमूहं पश्यति ॥ ६५ ॥

अथ चन्द्रग्रहणं युग्मेन । दीपमिति । प्रथमतस्तु बहुशो लाक्षारसेन भावितां तूलवर्त्तिकां—

---

१. साधको व्रजतीत्यर्थः[2]

दोषमलक्तककवर्त्या करंजतैलप्रदिग्धया कृत्वा ।
हरिचर्म्मणा सुपिहितं विशालमुखभाण्डमध्यस्थम् ॥ ६६ ॥

कृत्वा ततः करञ्जतैलेनात्यर्थं तां वर्त्तिकां पुनर्भावयित्वा तया वर्त्या दीपं प्रज्वाल्य विस्तीर्णमुखभाण्डमध्ये स्थापयित्वा भाण्डमुखं वानर-चर्मणा पिधाय सदीपं नीरन्ध्रं तद्भाण्डमंभसि यावन्न मज्जति तावत्कालप्रमाणं चन्द्रस्य ग्रहणं भवतीति। अस्मिन्प्रकरणे सर्वत्र मंत्रजपपुरश्चरणादियुक्तस्य साधकस्येदं—

तद्वनगतं च तद्वच्चन्द्रज्योत्स्नां विशेषयति ।
पयसि च मज्जति यावत्तावद् ग्रहणं भवेदिन्दोः ॥ ६७ ॥

॥ युग्मं इति सूर्य्यसोमग्रहणम् ॥

सर्वं भवतीति प्रायशः प्रतिभासते ॥ ६६–६७ ॥

॥ इति सूर्यसोमग्रहणम्[1] ॥

। अथावेशविधानम् ।

मृतककलेवरस्यास्ये कृष्णचतुर्दश्यां प्रक्षिप्तं गुग्गुलुं पुनस्तन्मुख-मध्यादाकृष्य—

। अथावेशविधानाधिकारः ।

शवपुरुषवदनकुहरा[2]च्चिताग्निनादीपितं पुरं कृष्णे ।
भूताह्वि जगदशेषं धूपादावेशयत्याशु ॥ ६८ ॥

आनीतं चिताग्निना दीपितं कृत्वा तद्धूपेन सकलं जगदपि आवेशयति किं पुनरेकं सत्त्वमित्यर्थः ॥ ६८ ॥

योगान्तरमाह। कनकेति। कनकं धतूरबीजं, आलं हरितालम्, मातुलानी विजया, चित्रं चित्रकः, वचा उग्रगन्धा, कुक्कुटाण्डखण्डाश्च। एतेषामौषधानां मिलितानां धूपात्स्वस्थं सचराचरं—

कनकालमातुलानीचित्रवचा-कुक्कुटाण्डशकलानि ।
आवेशयन्ति धूपात्स्वस्थं सचराचरं लोकम् ॥ ६९ ॥

---

१. रविचन्द्रपर्वः[3] २. शववदनकुहरसंस्थं[2,3]

स्थावरजंगमात्मकं लोकमप्यावेशयन्ति। अनेन धूपेन सचराचरस्यावेशो भवति किं पुनर्नरमात्रस्येत्यर्थः ॥ ६९ ॥

किञ्च। महिषेति। पञ्चाङ्गो योऽसौ कनकविटपी धत्तूरस्तस्य चूर्णं माहिषरुधिरेण सह बहुशो भावयित्वा शुष्कं विधाय षोडशभागवत्सनागविषं संयुक्तं कृत्वा रात्रौ कृष्णचतुर्दश्यामिति ज्ञेयम्। तस्य धूपात्पुरुषाणां—

महिषरुधिरप्रदिग्धः पञ्चाङ्गः षोडशांशविषयुक्तः।
कनकविटपिप्रधूपाद्रात्रौ चेष्टाहरः पुंसाम् ॥ ७० ॥

॥ इत्यावेशाधिकारः ॥

चेष्टाःहरति, आविष्टमिव पुरुषं करोतीत्यर्थः। पंचाङ्गस्तु कनकविटपीत्युक्त्या कनकवृक्षस्य मूलस्कन्धपत्रपुष्पफलानि च चूर्णीकृत्य ग्राह्यानीति ॥ ७० ॥

॥ इत्यावेशाधिकारः ॥

अथ विषप्रयोगविधानम्। सिततुरगेति। सिततुरगमारः श्वेतकरवीरं तस्य मूलं। रवितरुरर्कवृक्षस्तस्य शलभः कीटकः, वृश्चिकस्यारं वृश्चिकस्य कण्टकः, विषं वत्सनागस्तस्य सप्तमो भागश्च—

। अथ विषप्रयोगविधानम्।

सिततुरगमारमूलं रवितरुशलभश्च वृश्चिकस्यारम्।
विषसप्तभागसहितैरेभिर्गोनासदष्टवद् भवति[1] ॥ ७१ ॥

एतान्यौषधानि मेलयित्वा जलेन पिष्ट्वा एभिः स्वहस्तनलिकां प्रलिप्य यः स्पृशति स गोनासदष्टवत् प्रतिभाति सर्पदष्टवद् भासते। तस्याङ्गं कणकणायत इत्यर्थः। गोनासः सर्पविशेषः ॥ ७१ ॥

दिनकरेति। वानरी कपिकच्छूस्तस्या रोमाणि, चित्रकूटशैलखटिका च एतद् द्वयं चूर्णयित्वा सप्तदिनानि यावदर्कदुग्धेन भावयित्वा पुनरपि खटिकाशकलरूपा गुटिका कार्या तया खटिकया पृथिव्यास्तले—

---

१. भाति[3]

दिनकरदुग्धाभ्यक्ता सप्तदिनं वानरी तथा खटिका[1] ।
लिखितः स्पृष्टो विषदस्ताभ्यां भुवि भवति भोगीन्द्रः ॥७२॥

॥ इति विषप्रयोगः ॥

लिखितं सर्परूपं यः स्पृशति स सर्प्पदष्ट इव प्रतिभासते। ताभ्यां खटिकावानरीभ्यां भुवि लिखितः सर्प्पः स्पृष्टः सन् विषदीभवतीत्यर्थः ॥७२॥

॥ इति विषप्रयोगः ॥

मलयेति । मलयभवं चन्दनम्, नागकेसरं प्रसिद्धम्, व्याधिः कुष्ठम्, तगरं च एतान्यौषधान्येकीकृत्य संचूर्णयेत् ततस्तण्डुलोदकेन पिष्ट्वा मध्ये पिबेत्। वाह्ये दंशस्थले च लेपं—

। अथ विषापहारः ।

मलयभवनागकेसरमदनफलव्याधितगरसंयुक्तः ।
क्षपयति विषं विचित्रं तण्डुलतोयेन संयुतो ह्यगदः ॥७३॥

दद्यात्। विचित्रं नानाप्रकारं स्थावरजंगमकृत्रिमं सर्वमपि विषमयमगदो नाशयति। न केवलं पूर्वोक्तैर्योगैरुत्पादितं कृत्रिममेव विषं प्रयातीत्यर्थः ॥ ७३ ॥

किञ्च। तद्दिवसेति। तस्मिन्नेव दिने जातः समुत्पन्नो यो वत्सकस्तस्य वर्चो विष्ठा। तगरं नागकण्ठकम्[2]। आभ्यां गुटिकां कृत्वा ताङ्गुटिकां संभक्ष्य चर्वित्वा निगीर्य्य पश्चाद्यथेष्टं विषं भक्षयेत् विषस्य दोषो—

तद्दिवसजातवत्सकवर्चोभिस्तगरगर्भितां गुटिकाम् ।
संभक्ष्य यथाकामं विषं पिबेच्छूलपाणिरिव ॥ ७४ ॥

न प्रभवति। शूलपाणिरिव। यथा पुरा महार्णवमथनारंभे यथेष्टमीश्वरेण कालकूटं भक्षितं तथा असावपि साधको विषं भक्षयेत्। परंतु न कोऽप्येतस्य विषजनितदोषः स्यादित्यर्थः ॥ ७४ ॥

भेक इति। भेको मण्डूकस्तस्य वसा। द्विमुखः सर्प्पः डुंडुभस्तस्य च वसा। कटुकी प्रसिद्धा। श्लेष्मातकवृक्षफलानि च। एतानि चत्वार्यौष-

१. गुटिका[1] २. टंककं[2]

धानि एकत्र पिष्ट्वा हस्ततलं विलिप्य तेन हस्ततलेन संस्पर्शात्—

भेकद्विमुखाहिवसा-कटुकीश्लेष्मातपादपफलानि ।
एभिर्विलिप्तपाणिः स्पर्शाद्दंशाद्विषं हरति ॥ ७५ ॥

सर्वाणि विषाणि प्रयान्ति न केवलं दंशाज्जातं विषं तादृशः साधको हरतीति ॥ ७५ ॥

गोघृतेति । सुरभीघृतं, थोहरिदुग्धम् , मयूररक्तम् , द्विमुखसर्पमांसास्थिखण्डाश्च । एतानि वर्त्तयित्वा तैः प्रलिप्तं यत्तूर्यं पटहडमरुकादिकं तस्य योऽसौ नादस्तत्प्रभावेण त्रिभुवनमपि निर्विषं भवति ।

गोघृतवज्रीबर्हिक्षतज-द्विमुखाहिपिशितकंकालैः ।
प्रविलिप्ततूर्य्यनादस्त्रिभुवनमपि निर्विषं कुरुते ॥ ७६ ॥

॥ इति विषापहारः ॥

यदा डङ्कः पतति तदा एतैरौषधैर्डमरुकपुटानि प्रलिप्य पश्चाड्डमरुकं डङ्कस्याग्रे वाद्यते विषनिग्रहो भवतीत्यर्थः ॥ ७६॥

॥ इति विषापहारः ॥

। अथ विषमज्वरापहारः ।

नग्नादीति । कृष्णचर्दशीदिवसे मध्याह्नकाले मुक्तकेशकक्षो नग्नो भूत्वा शिखायां रक्षाग्रन्थिं बद्ध्वा, अङ्गरक्षां षडङ्गविधिना कृत्वा, अष्टौ दिक्पालानाहूय पूजयित्वा, ओषधिमभिमंत्र्य पुष्पाक्षतधूपदीपचन्दनादिविधानात्संपूज्य संप्रार्थ्य चौषधिं खनेत् । इत्ययं नग्नादि—

नग्नादिविधिसमाहृतबालकमूलस्य सप्तशकलानि ।
क्षपयन्ति भूततिथ्यां[1] चातुर्थिकं पाणिबद्धानि ॥ ७७ ॥

विधिः ॥ अनेन नग्नादिविधिना कृष्णचतुर्दशीदिवसे मध्याह्ने बालकमूलं ह्रीवेरं तस्य सप्तशकलानि खण्डानि कृत्वा हरिद्रारंजितसूत्रेण कन्याकर्तितेनेति ज्ञेयम् । ततो ज्वरिणां हस्ते बद्धानि चातुर्थिकं ज्वरं क्षपयन्ति सर्वथा दूरीकुर्वन्ति नान्यथा ॥ ७७ ॥

---

१. दिवसे २, ३

किञ्च । दिग्वसनेति । अथवा पूर्ववदेव दिग्वसनादिविधानेन कृष्ण-चतुर्दश्यां नागिनीमूलं गोवत्सा—

दिग्वसनादिसुविधिना गृहीतमसितेऽह्नि नागिनीमूलम् ।
तक्रेण तस्य पानात् क्षपयति चातुर्थिकं घोरम् ॥७८॥

॥ इति विषमज्वरापहारः ॥

मूलम् गोजिभीति प्रसिद्धम् । तक्रेण गोतक्रेणेति ज्ञेयम् । पीतं सन्महाघोरं महारौद्रमपि चातुर्थिकं ज्वरं क्षपयति नाशयत्येव ॥ ७८ ॥

॥ इति विषमज्वरापहारः ॥

ओंकारेति । ओंकार चक्र हुँ फट् इति । स्वरूपसिद्धममुं मंत्रं साधकस्य दक्षिणहस्तेन वामहस्ते कुंकुमादिसुरभिद्रव्यैर्गुरूक्तविधिना चक्रन्यासेन सह लिखितं यदा ग्रहगृहीतः पश्यति तदैव ग्रहो नश्यति । अयं मंत्रो भूतडामर इति भणितत्वात्प्रसिद्धः । भूतानां यक्षराक्षसशाकिन्यादीनां डामरः अन्तकारः ॥

। अथ भूतनाशनम् ।

ओंकारचक्रहुँफट्चक्रन्यासेन हस्तविन्यस्तः ।
ग्रहमोक्षणं प्रकुरुते मंत्रोऽयं भूतडामरः सिद्धः ॥ ७९ ॥

यद्यपि सन्त्यन्ये बहवो मंत्राः पृथिव्यां ते तु व्रतोपवासमण्डलजपपूजाध्यानादिकष्टपरंपरया साधिताः सन्तः सफला भवन्ति तथाप्ययं तु दृष्टमात्र एव ग्रहमोक्षादिकार्य्यं साधयति । प्रस्तावाच्च उलूकस्य दक्षिणपक्षं श्वेतसूत्रेण वेष्टयित्वा ग्रहग्रस्तदक्षिणे हस्ते बध्नीयात् । पूर्ववदेव फलं भवतीति ॥ ७९ ॥

योगान्तरमाह । गोगवलेति । गोशृंगं, विडालविष्ठा, हस्तिनखम् , सर्प्पकंचुकः, मयूरपिच्छानि, दुर्गन्धा शतपुष्पा वचा वा उग्रगंधापर्य्यायत्वात्, लशुनं, हिंगु चेत्येतान्यौषधान्येकत्र चूर्णीकृत्य मेलयित्वा

गोगवलविडालशकृत्करिकररुहभुजगकवचशिखिचन्द्रैः ।
ग्रहकेतुरयन्धूपो दुर्गन्धालशुनहिंगुभिर्युक्तः ॥ ८० ॥

॥ इति ग्रहमोक्षाधिकारः ॥

ग्रहगृहीताय अष्टद्रव्यात्मको धूपो दीयते तेन ग्रहो ग्रस्तं विमुच्य प्रणश्यति । भुजगवर्च इत्यन्यमते सर्पगरलं योगमध्ये प्रक्षिप्यते ग्रहान् कृन्तति छिनत्तीति । ग्रहकेतुग्रहराक्षसडाकिनीप्रभृतीनां नाशकोऽयन्धूप इत्यर्थः ॥ ८० ॥

॥ इति भूतनाशनम् ॥

भूनागाङ्गेति । भूनागो वर्षाकालोद्भवो जीवविशेषः सौराष्ट्रदेश भाषया अणसला इति प्रसिद्धः, कान्यकुब्जदेशभाषया केचुवेति प्रसिद्धः । तस्यांगं शरीरं, शिला मनःशिला, आलं हरितालं चैतानि—

। अथज्योतिर्दर्शनम् ।

भूनागाङ्गशिलालैः सर्षपतैलेन मर्दितः कल्कः ।
रजनिबहुलान्धकारे नृविग्रहं ज्वालयत्येषः ॥ ८१ ॥

त्रीण्यौषधानि एकत्र चूर्णयित्वा कल्को विधेयस्ततः सर्षपतैलेन सहितेन कल्केन शरीरस्याभ्यंगः कार्य्यस्तेन सान्धकाररात्रौ दीप्तं ज्वलन्तमग्निमिव साधकशरीरं लोकैर्दृश्यते ॥ ८१ ॥

खद्योतेति । खद्योतशक्रगोपौ वर्षाकालीनौ प्रसिद्धौ जीवविशेषौ । आमलकीफलबीजतैलं शणबीजतैलञ्च निष्काष्य तत्तैलमध्ये खद्योतेन्द्र गोपयोः शरीरं शोषयित्वा सूक्ष्मचूर्णरूपं कल्कं कृत्वा तेन—

खद्योतशक्रगोपकधात्रीशणबीजतैलकल्केन ।
प्रज्वलति विग्रहाद्यं रात्रौ यल्लिप्यते किञ्चित् ॥ ८२ ॥

॥ इति ज्योतिर्दर्शनम् ॥

कल्केन यत्किंचिद्विग्रहाद्यं देहादिकं रात्रौ लिप्यते तत्सर्वं प्रज्वलति प्रज्वलदिव लोकैर्दृश्यत इत्यर्थः ॥ ८२ ॥

॥ इति ज्योतिर्दर्शनम् ॥

। अथाञ्जनाधिकारः ।

धूर्त्तेति । धूर्तमृगः शृगालस्तस्य नेत्रे चूर्णीकृत्य पानीयेन घर्षयित्वा क्रमशो गुटिके द्वे बद्ध्वा पुनः क्रमात्तद्दक्षिणाक्षिगुटिकया स्वदक्षिण लोचनं वामाक्षिभूतया वामं चैवं ताभ्यां गुटिका—

---

१. धरणीलता[1]

धूर्त्तमृगनेत्रचूर्णैरञ्जितलोचनयुगः पश्येत् ।
तस्मै भूतानि तदा सिद्धद्रव्यं प्रयच्छन्ति ॥

॥ इत्यञ्जनाधिकारः ॥

श्यामञ्जितलोचनयुगः साधकः । तदेति पदेन पूर्वोक्ता रात्रिः संबध्यते कृष्णचतुर्द्दशी मंगलयुक्ता प्रशस्यते । तस्माद्रात्रौ भूतानि यक्षराक्षसवृन्दानि पश्यति । तानि यक्षादीनि पश्यते तस्मै साधकाय सिद्धं द्रव्यमञ्जनपादुकान्तर्धानाकाशगमनादि प्रयच्छन्ति ॥ ८३ ॥

॥ इत्यञ्जनाधिकारः ॥

पटह इति । पटहो वाद्यविशेषः, स प्रदीपगर्भः प्रदीपो गर्भो मध्ये यस्य स तथा, तनुतरेणातिसूक्ष्मेण पत्तलेन वानरचर्मणा कृतं छदनमाच्छादनं यस्य स तथा । एवंविधः—

। अथ चन्द्रज्योत्स्नाधिक्यम् ।

पटहः प्रदीपगर्भस्तनुहरिचर्मणा कृतच्छदनः[1] ।
गृहमध्यगः क्षपायां चन्द्रज्योत्स्नां विशेषयति ॥ ८४ ॥

॥ इति चन्द्रज्योत्स्नाधिक्यम् ॥

पटहो रात्रौ गृहमध्ये स्थापितः सन् चंद्रस्य ज्योत्स्नां प्रभां विशेषयति आधिक्येन करोतीत्यर्थः ॥ ८४ ॥

॥ इति चन्द्रज्योत्स्नाधिक्यम् ॥

। अथ वन्ध्यापुत्रजन्म ।

क्षीरातिबलेति । क्षीरं गोदुग्धं तत्रापि सवर्णायाः सवत्साया इति यावत् । अतिबला काकही इति प्रसिद्धा । यष्टी मधुयष्टी जेठीमधु इति प्रसिद्धम् । घृतं गोघृतं, बला वरिआरा—

क्षीरातिबलायष्टीघृतं बला शर्करार्त्तवे काले ।
अवलिह्य संप्रसूते वन्ध्या लोकेश्वरं पुत्रम् ॥ ८५ ॥

इति प्रसिद्धः । शर्करा मत्स्यण्डी, एतान्यौषधानि चूर्णयित्वा ऋतुकालेऽवलेहं कृत्वा वन्ध्यापि लोकेश्वरं पुत्रं प्रसूते लोकानामीश्वरं

१. तनुतरहरिचर्मणा कृतच्छदनः[२,३]

महाराजमित्यर्थः। अनेन योगेन वन्ध्यापि गर्भं धारयति किं पुनरन्या नारीत्यर्थः ॥ ८५ ॥

योगान्तरमाह। अश्वत्थेति। रेवतीनक्षत्रे पिप्पलवृक्षोत्थितं वन्दाकं वृक्षखण्डं चतुरंगुलं गृहीत्वा रेवतीनक्षत्रे हस्ते कन्याकर्तितेन सूत्रेण बद्ध्वा वन्ध्या गर्भं धारयतीति अवश्यमेव नान्यथेति दिक्। वृक्षो—

अश्वत्थतरुसमुत्थं वन्दाकं सम्प्रगृह्य रेवत्याम्।
बद्धेन तेन पाणौ वन्ध्या गर्भं प्रगृह्णाति ॥ ८६ ॥

॥ इति वन्ध्यापुत्रजननम् ॥

परि योऽसावन्यवृक्ष उत्पद्यते वल्ली वा काचिद्वन्दाक इत्यभिधीयते। श्रीनागार्जुनाचार्य्यचरणप्रसादादेष योगः फलतु साधकानाम् ॥८६॥

॥ इति वन्ध्यापुत्रजननम् ॥

व्याघ्रेति। व्याघ्रक्षतभवं व्याघ्ररक्तं मांसखण्डानि च। भ्रमरो, दधि दुग्धविकारः—

। अथ व्याघ्रदर्शनम्।

व्याघ्रक्षतभवपिशितैर्भ्रमरैर्दध्युत्पलान्वितैः कुंडे ।
षण्मासप्राणधरं सप्ताहाद् व्याघ्रमिथुनजन्म[1] स्यात् ॥८७॥

॥ इति व्याघ्रदर्शनम् ॥

उत्पलानि कुसुमविशेषाः, एतानि चूर्णयित्वा जलेनालोड्य सप्तदिनानि यावत् कुण्डमध्ये स्थाप्यन्ते। ततः सप्तमे दिवसे षण्मासजीवितं व्याघ्रयुग्ममुत्पद्यते ॥ ८७ ॥

॥ इति व्याघ्रदर्शनम् ॥

मिथुनेति। मिथुनं स्त्रीपुरुषयुगलं तयोर्मलं शरीरादेः समुत्पन्नं मालिन्यं तथा तयोरेव रुधिरं तथा तयोरेव ऐन्द्रियं इन्द्रियसमुद्भूतं शुक्रमित्यर्थः। तथा तयोरेव कर्णमलं तथा तयोरेवाक्षिमलं—

---

१. मिथुनं[2,3]

। अथ मनुष्यदर्शनम् ।

मिथुनमलरुधिरमैन्द्रियकर्णाक्षिमलं प्रमथ्य तत्पयसा ।
हुडकृत्तिवृत्तैरेभिर्नरमिथुनं जायते त्रिसप्ताहात् ॥८८॥

॥ इति मनुष्यदर्शनम् ॥

दूषिकेत्यर्थः । एतान्यौषधानि तत्पयसा नारीदुग्धेन प्रमथ्य मर्द्दयित्वा एकविंशतिदिनानि यावत् पूर्ववदेव कुण्डमध्ये संस्थाप्य, हुडचर्मणा वृकचर्मणा कुण्डमुखं वेष्टयित्वा संस्थापनीयं तत् एकविंशतिभिर्द्दिनैस्तन्मध्यात्पुरुषनारीयुगलमुत्पद्यते ॥ ८८ ॥

॥ इति मनुष्यदर्शनम् ॥

ललनेति । अग्रे प्रथममेव सुरतात्पूर्वमेवेत्यर्थः । नारीणां कटितटे बद्धं मातुलमूलं धत्तूरकमूलं गर्भं निवारयति । तथा सुरतनिषेवणकाले बद्धं सत् एतन्मूलं कनकमूलं सपुष्पकं गर्भं निवारयति ।

। अथ वंध्याकरणम् ।

ललनानितंबबद्धं मातुलमूलं निवारयत्यग्रे ।
नित्यं सुरतनिषेवणकाले गर्भं सपुष्पकं दृष्टम् ॥ ८९ ॥

ऋतुकालेऽपि कटितटे बद्धं नारीणां गर्भं निवारयतीत्यर्थः । अनुभूतोऽयं प्रयोग इत्याह दृष्टमिति शतशोऽनुभूतमिदमस्माभिरित्यर्थः ॥ ८९ ॥

संभक्ष्येति । आर्त्तवे चापि यथाकाले ऋतुसमय इत्यर्थः । पुराणघृतमात्रं पुराणं जीर्णं गोघृतमात्रं केवलं संभक्ष्य सम्यक् पीत्वा । अनिशमतिशयेन सुरतासक्तापि नारी गर्भं न गृह्णाति । रात्रा—

संभक्ष्य यथाकाले पुराणघृतमात्रमार्तवे चापि ।
अनिशं सुरतासक्ता रामा गर्भं न गृह्णाति ॥ ९० ॥

वत्यर्थं कामसेवातत्परापि नारी ऋतुसमये जीर्णगोघृतपानादेव सर्वथा गर्भं न गृह्णातीत्यर्थः ॥ ९० ॥

---

१. मानुष[२]

योगान्तरमाह । धात्रीति । धात्री आमलकी तच्चूर्ण, अञ्जनं सुरमेति प्रसिद्धम् । सौवीराञ्जनचूर्णमिति पाठे बदरचूर्णमञ्जनचूर्णञ्च पुष्यनक्षत्रे एकत्रीकृत्य यदा शीतलेनोदकेनालोड्य पुष्यनक्षत्रे—

धात्र्यञ्जनभवचूर्णं पीत्वा शीतेन वारिणा पुष्ये ।
गर्भर्तुभीतिरहिता विचरतु कामातुरा रण्डा ॥ ९१ ॥

एव पीयते तदा गर्भभयं ऋतुभयं च न भवति । भर्तृरहिता नारी गर्भाभावमृत्वभावं च वाञ्छती सती अत एव तद्द्वयाभावाद् भयरहिता रण्डा यथेष्टं सुरतसुखं कुर्वाणा कामातुरा भूत्वा पृथिव्यां पर्य्यटतु॥९१॥

सुरपतीति । या काचिदृतुमती नारी इन्द्रगोपालाख्य (कीट) चूर्णं पानीयेन सह पिबति लेढि वा ऋतु—

सुरपतिगोपतिचूर्णमृतुमल्ललना जलेन या पिबति ।
गर्भार्त्तवे तु तस्याः दूरं प्रोत्सारिते भवतः ॥९२॥

॥ इति वन्ध्याकरणम् ॥

काले पिबतीत्यर्थः । तस्या गर्भार्तवे गर्भः ऋतुकालश्चोभौ दूरं यथा स्यात्तथा प्रोत्सारिते भवतः । तौ न भवत एवेत्यर्थः ॥ ९२ ॥

॥ इति वन्ध्याकरणम् ॥

सदलक्तकेति । यत्र भवने यस्मिन्गृहे सदलक्तकं प्रधानलाक्षारसः, इन्द्रगोपकृमिः, कपिलागोघृतं च एतैस्त्रिभिः प्रसाधितो निष्पादितो दीपः प्रज्वलति तस्मिन्गृहे कामयमानानां नराणां नारीणां—

। अथ लिंगवृद्धिदाद्यौधिकारः ।

सदलक्तकसुरगोपककपिलाघृतसंप्रसाधितो दीपः ।
प्रज्वलति यत्र भवने वराङ्गभङ्गो न जातुचित्तत्र ॥ ९३ ॥

च कदाचिद्वराङ्गभंगो न भवति लिंगयोन्यादिकं न नश्यतीत्यर्थः । समुदितोऽयं योग इति ज्ञेयम् ॥ ९३ ॥

किञ्च । श्वेतार्केति । यस्मिंश्च गृहे शूकरवसाप्रदिग्धया अतिशयेन वराहमेदसा भावितया श्वेतार्क—

श्वेतार्कतूलवर्त्या वराहमेदःप्रदिग्धया दीपात्[1] ।
स्तब्धम्पुरुषवराङ्गं न नमति रमते स[2] शर्वरीं सकलाम् ॥९४॥

तूलवर्त्या दीपं प्रज्वाल्य तत्र कामयमानस्य पुरुषस्य समग्रां रात्रिं यावन् लिङ्गं न पतति स्तब्धमेव तिष्ठति ॥ ९४ ॥

योगान्तरमाह । बृहतीति । बृहती कण्टकारिकाफलं, सितसिद्धार्थाः श्वेतसर्षपाः, व्याधिः कुष्ठं, वचा उग्रगन्धा, तुरगगंधा अश्वगंधा । एतासामोषधीनां चूर्णं पानीयेन श्लक्ष्णं पिष्ट्वा एतैरौषधैः—

बृहतीसितसिद्धार्थव्याधिवचातुरगगन्धया सहितम् ।
एभिः प्रलेपितं सत्पुरुषवराङ्गं हयस्येव ॥ ९५ ॥

पुरुषवराङ्गं लिंगं पुनः पुनर्ल्लेपितं मर्द्दितञ्च सत् हयस्येव स्तब्धं भवतीत्यर्थः ॥ ९५ ॥

घृतेति । घृतमाज्यम् , मधु माक्षिकम् , तिलतैलम् , बृहती कण्टकारिकाफलम् , शूलं शैवालं, आत्मगुप्ता कपिकच्छूः प्रसिद्धा । एतानि जलेन पेषयित्वा ताम्रभाण्डे प्रक्षिप्य सप्त दिनानि—

घृतमधुयुक्तं तैलं बृहतीफलशूलमात्मगुप्ताश्च ।
एभिर्वराङ्गवृद्धिः सप्तदिनं ताम्रभाण्डपर्य्युषितैः ॥ ९६ ॥

॥ इति लिङ्गवृद्धिदार्ढ्याधिकारः ॥

यावत्संस्थाप्य ततो लिंगलेपनं मर्द्दनञ्च कार्य्यम् तेन लिंगवृद्धिर्भवतीति ॥ ९६ ॥

॥ इति लिङ्गवृद्धिदार्ढ्याधिकारः ॥

सूत इति । करंजफलं कोरयित्वा मध्ये पारदं प्रक्षिप्य पश्चात्तत्सूतं करंजफले मध्यगतं तथा श्वेतशरपुंखामूलञ्च एतद्वस्तुद्वयं मुखे प्रक्षिप्य यदा सुरतं क्रियते तदा पुरुषेच्छा यावत्तावद्वीर्य—

। अथ शुक्रस्तंभनम् ।

सूतः करञ्जयुक्तः सितमार्ग्गणपुंखिकामूलम्[4] ।
वदनविवरान्तरस्थं स्तम्भयति नरेच्छया वीर्य्यम् ॥ ९७ ॥

---

१. दीपः[3] २. धारयति च[3] ।
३. शूक[2,3] ४. सूतः करञ्जफलगो युक्तः सितपुंखिकाशिफया[2]

स्तंभो भवति । यदा मोक्ष इष्यते तदा एतद् वस्तुद्वयं चर्वयित्वा गिल्यते तदा वीर्यमोक्षो भवति ॥ ९७ ॥

गोमाय्विति । पूर्वं गोमायुना शृगालेन चीर्णं भक्षितं यद् बदरफलं सौवीरफलं अनन्तरं जीर्णं गुदद्वारा निःसृतं यद् बदरास्थि बदरीफलाष्ठीवकभूतं तत् सच्छिद्रं कृत्वा पश्चात्क्षीरकीटकं हृदयेन सह—

गोमायुचीर्णजीर्णं बदरास्थि क्षीरकीटसंयुक्तम् ।
धारयति पुरुषबीजं कटितटबद्धं खरस्य पुच्छरुहैः ॥ ९८ ॥

युक्तं कृत्वा रासभपुच्छकेशैर्दोरकं विधाय तेन डोरकेनैतद् द्वयं पुरुषस्य कटितटे बद्धं सत् पुरुषस्य बीजं वीर्यं यथेच्छं धारयति, वीर्यस्तंभो भवतीत्यर्थः । कटितटादुन्मोचनान्मोक्षश्च ॥ ९८ ॥

षड्बिन्द्विति । षड्बिन्दुर्भ्रमरः कीटविशेषस्तस्य यद् देहजं चूर्णं खरमञ्जर्याः दीर्घशिखायाः[1] शिफा मूलं—

षड्बिन्दुदेहचूर्णैः खरमञ्जर्य्याः शिफासमायुक्तैः ।
दिवसकरतूलवर्त्या यो दीपः शुक्ररोधक[2]त्पुंसाम् ॥ ९९ ॥

तस्यापि चूर्णमर्कतूलेन वर्त्तिं पूर्वोक्तचूर्णसहितां कृत्वा यस्य गेहस्य मध्ये तया वर्त्तिकया दीपः प्रज्वाल्यते तद्गृहमध्ये कामयमानानां पुंसां वीर्य्यस्तंभो भवति ॥ ९९ ॥

आजमिति । आजं छागदुग्धं, वज्री स्नुही थोहरिदुग्धं, गोघृतं च एतत् त्रितयमेकीकृत्य पाद—

आजं वज्रीक्षीरं गव्यघृतं चरणयुगललेपेन ।
स्तंभयति पुरुषबीजं योगोऽयं यामिनीं सकलाम् ॥ १०० ॥

॥ इति शुक्रस्तम्भनम् ॥

तलयुगं लेपनीयम् । तेन कामयमानानां पुंसा रेतः सकलां रात्रिं यावत्स्तंभो भवति । अयं योगः पुरुषबीजं स्तंभयत्येव नान्यथेति दिक् ॥ १०० ॥

॥ इति शुक्रस्तम्भनम् ॥

सार्द्रमिति । यस्या नार्य्या वर्चो गूथं सार्द्रमशुष्कं वृश्चिककंटकेन विद्धं कृत्वा क्षितिरंध्रे भूमिगर्त्ते निःक्षिप्य उपरि धूल्या निरुध्यते यावत्तावत्तस्या नार्याःघोरमतिपीड़ाकरं वरांगदुःखं योनिशूलं—

---

१. शाखायाः[2]　　२. कः[3]

। अथ योनिशूलकरणमोक्षौ ।

सार्द्रं क्षितिरन्ध्रगतं स्त्रीवर्चो वृश्चिकालसंविद्धम् ।
घोरं वराङ्गदुःखं विसृजति यावत्तदुद्धृते शं स्यात् ॥१०१॥

॥ इति योनिशूलकरणमोक्षौ ॥

भवति ॥ ततस्तस्माद् गर्त्तात्तस्मिन्नुद्धृते सति शं स्यात्, शूलमोक्षो भवतीत्यर्थः ॥ १०१ ॥

॥ इति शूलकरणमोक्षौ ॥

कुष्ठमिति । सप्त दिनानि यावत्कृष्णसर्पमुखे गुञ्जा परिवसति । अथवा सप्त दिनानि यावत्तत्र गृहगोधिका परिवसति पश्चात्तत आकृष्य रात्रौ यस्यारातेः खाने पाने प्रदत्ता सती तस्मिन्नरातौ कुष्ठं विसृजति—

। अथ कुष्ठकरणम् ।

कुष्ठमरातौ विसृजति सप्तदिनं भुजगवदनपर्य्युषिता ।
गुञ्जाऽथ भवनगोधा यावत्क्वाथं पियालजं न पिबेत् ॥१०२॥

॥ इति कुष्ठकरणम् ॥

तस्यांगे कुष्ठं करोतीत्यर्थः । ततः शत्रुः पियालवृक्षस्य दिवसत्रयपर्यन्तं पंचांगक्वाथमष्टावशेषं पिबेत्तदानीं तत्कुष्ठं निवर्त्तत इत्यर्थः ॥ १०२ ॥

॥ इति कुष्ठकरणम् ॥

शकृदिति । काकहृदयरुधिरेण काकपक्षलेखन्या काकपक्षे यस्य नाम लिखित्वा तदीयगूथमध्ये—

। अथ काकघातोद्वेगः ।

शकृदन्तर्निक्षिप्तं द्विकहृदयक्षतजपक्षसंलिखितम् ।
यन्नाम द्विकसंघाः खादन्ति निरंतरं तमिह ॥ १०३ ॥

काकगूथ एव प्रक्षिप्यते यदि तदा स काकै र्निरन्तरं भक्ष्यते । तत उद्धृते मोक्षः काकैर्न भक्ष्यते इत्यर्थः ।। १०३ ।।

द्रोणेति ।। द्रोणः कृष्णकाकस्तस्य हृदयरक्तेनाम्रवृक्षपत्रे यस्य नाम विन्यस्य उपरितनगूथेन काक—

अथ योगान्तरमाह—

द्रोणहृदयरुधिरेण च चूतदले यस्य नाम विन्यस्तम् ।
तद्वर्च्चोऽन्तर्निहितं काकैः संभक्ष्यते सोऽपि ॥१०४॥

॥ इति काकघातोद्वेगः ॥

गूथेनैवाच्छाद्य यदि स्थाप्यते तदा स काकै र्निरंतरं भक्ष्यते तत उद्धृते मोक्षः, पूर्ववदेवार्थः ।। १०४ ।।

।। इति काकघातोद्वेगः ।।

गोष्ठेति । कलशे कृकलासं प्राणिविशेषं निक्षिप्य गोकुलद्वारभूमौ यदि निखन्यते उपरि धूल्या आच्छाद्य स्थाप्यते तं यथास्थितं कुंभं यदा गावो निर्गमं प्रवेशं कुर्वत्य उल्लंघयति तदा गोष्ठे गावः सुप्ता—

। अथ गोहननजीवनाधिकारः ।

गोष्ठद्वारि निखापितकलशे कृकलासलंघनाद् गावः ।
सुप्ता विहन्यमाना अपि नोत्तिष्ठन्त्यनुद्धृते तस्मिन् ॥१०५॥

॥ इति गोहननजीवनाधिकारः ॥

इव मूर्च्छिता इव विशेषेण हन्यमाना अपि स्वस्थानान्नोत्तिष्ठन्ति सुप्ता इव तिष्ठन्ति । यावदसौ कुंभस्तस्मान्न बाह्ये आकृष्यते । आकृष्टे गावो निद्रारहिता यथापूर्वं यथेष्टं संचरन्तीत्यर्थः ।। १०५ ।।

।। इति गोहननजीवनाधिकारः ।।

मल्लकेति । यस्या नार्य्याः प्रसवन्त्या गर्भस्तंभचिकीर्षा जायते तस्या नाम हुडविदित्यक्षरविदर्भितं कृत्वा शरावे लेखनीयम् गैरिकेणेति संप्रदायः । ततस्तस्या गर्भस्तत्क्षणादेव स्तंभितो भवति—

। अथ गर्भस्तंभमोक्षणाधिकारः ।

मल्लकलिखितो हुडवित्प्रसवन्त्याः स्तंभनं करोत्युच्चैः ।
गर्भस्य सपदि नार्य्यास्तन्नामविदर्भितः सिद्धः ॥१०६॥

॥ इति गर्भस्तंभमोक्षणाधिकारः ॥

स च शरावो भूमौ निखातो यावत्तिष्ठति तावत्प्रसवो न भवति। अयञ्च मल्लकलिखितो योगः सिद्ध इति। ग्रन्थकारः स्थाने स्थाने सिद्धग्रहणं करोति अतोऽसाववश्यं गर्भस्तंभनं करोति। तत उद्धते धौते शरावे गर्भमोक्षोऽपि ॥ १०६ ॥

॥ इति गर्भस्तंभमोक्षणाधिकारः ॥

कोशेति। कोशाम्रस्य आम्रकोशस्य यत्तैलं तेन कृतो योऽसौ दीपः स प्रचण्डेऽपि मरुति वहति सति प्रज्वलति—

। अथ दीपनिर्वाणाधिकारः ।

कोशाम्रतैलदीपः प्रज्वलति प्रवहति प्रचण्डेऽपि ।
मरुति सति निष्प्रकम्पः स्फुरन्महारत्नदीप इव ॥१०७॥

॥ इति दीपनिर्वाणाधिकारः ॥

न नश्यति। स्फुरन्महारत्नदीप इव निश्चल एवावतिष्ठते इत्यर्थः ॥१०७॥

॥ इति दीपनिर्वाणाधिकारः ॥

रविरिति। रविशलभः, अर्कवक्षकीटः, गृहगोधिका तस्या विष्ठा, मनःशिला, हरीतकी चेत्येतै—

। अथ वृश्चिकविषापहारः ।

रविशलभ-भवनगोधावर्च्चश्च मनःशिला तथा पथ्या ।
वृश्चिकविषं विनश्यत्येभिर्द्दशंस्य लेपेन ॥१०८॥

श्चतुर्भिरौषधैर्ज्जलेन वर्त्तितैर्वृश्चिकदंशस्थले लेपः कार्यः वृश्चिकविषं नाशं प्रयाति ॥ १०८ ॥

पयसेति। पलाशवृक्षबीजानि सूक्ष्मचूर्णितानि कृत्वा अर्कक्षीरेणैक-विंशतिवारान् यावत्-

पयसा दिवाकरस्य च ब्रह्मतरोर्भावितैर्मुहुर्बीजैः ।
गुटिका कृता प्रयुक्ता वृश्चिकविषमाशु संहरति ॥ १०९ ॥

तावद् भावयित्वा तेनैव क्षीरेण गुटिकां कृत्वा तां पुनस्तत्क्षीरेणाभ्यज्य वश्चिकदंशस्थले लेपयेत् । वृश्चिकविषं झटिति नश्यति ॥ १०९ ॥

उत्तरेति । उत्तरस्यान्दिशि यानि दाडिमवृक्षस्य मूलानि गतानि तानि, गोमांसं च । एतद्द्वयं चूर्णयित्वा जलेन गुटिका कार्य्या । अनया गुटिकया वृश्चिकदंशे स्पृष्टे दंशाद् वृश्चिकविषं याति ।

उत्तरदिग्गतदाडिममूलैर्गोमांससम्मितैर्गुटिका ।
त्रिदशैरपि स्तुतेयं वृश्चिकविषदंशसंक्रमणे ॥ ११० ॥

अन्यस्मिन्पुरुषैः स्पृष्टे तत्र विषं प्रसर्पति । अत्रार्थे देवैरपीयं गुटिका प्रशंसिता ॥ ११० ॥

अंकोल्लेति । अंकोल्हमूलमंकोल्हतैलञ्च । दाडिममूलं दाडिमतैलञ्च । जम्बूमूलं जम्बूतैलञ्च । मधुशर्करा—

अंकोल्हमूलतैलं दाडिमजम्ब्वोश्च मूलतैलेन ।
मधुशर्करासमांशैर्वृश्चिकसंक्रामणी गुटिका ॥ १११ ॥

॥ इति वृश्चिकविषापहारः ॥

समांशैरेतैर्गुटिकां कारयेत् ॥ सा वृश्चिकविषसंक्रामणी भवति । स्थानान्तरं विषं नयतीत्यर्थः ॥ १११ ॥

॥ इति वृश्चिकविषापहारः ॥

भस्मेति । स्तब्धबीजचूर्णेन बोडथरी[1] बीजचूर्णेन आरण्यच्छाण[2]-भस्ममिश्रेण शरीरं विलिप्य-

। अथ मेघादिजलस्तंभाधिकारः ।

भस्मसहितेन विग्रहमवगुण्ठ्य स्तब्धबीजचूर्णेन ।
जलधरधारापातैः पर्य्यटति न कर्बुरः क्रियते ॥११२॥

---

१. बोलसरी[2] २. स्थान[1]

यदा मेघो वर्षति तत्र पर्य्यटति तदा तस्य शरीरे पानीयं न लगति । तेन पानीयेन कर्बुरोऽपि न क्रियते न प्लाव्यत इत्यर्थः ॥ ११२ ॥

सर्ज्जरसेति । सर्ज्जरसलोहकारसौ प्रसिद्धौ रालशिलारसौ । श्वेतार्कपुष्परसश्च । एभिः पटो लिप्तः सन् पश्चात्तस्य पटस्योपरि पानीयं प्रक्षिप्यते तत्पानीयं पटे न लगति जलेन सिच्यमानोऽपि—

सर्ज्जरसलोहकारसलिप्तो मन्दारकुसुमसलिलैश्च ।
न भवति सुसिच्यमानः सलिलेनार्द्रः पटः प्रकटम् ॥११३॥

॥ इति मेघादिजलस्तंभाधिकारः ॥

सन् आर्द्रो न भवतीत्यर्थः । एतत्प्रकटं समस्तलोकानुभवसिद्धम् ॥११३॥

॥ इति मेघादिजलस्तंभाधिकारः ॥

हरितर्विति । वर्णाः सिन्दूरहरितालादयः, तैर्हरितरुमूलरसाक्तैः । हरिवृक्षोऽश्वत्थः, अर्कवृक्षो-

। अथ पटान्त(पटगत)चित्रादर्शनम् ।

हरितरुमूलरसाक्तैरालेख्यं वर्णकैः पटे लिखितम् ।
शुष्कं न दृश्यते तद् दृश्यं चाम्भोभिरासिक्तम् ॥११४॥

वा । तन्मूलरसेन मिश्रितैर्वर्णकैः पटे लिखितं चित्रं शुष्कं सत् न दृश्यते । तदेव च जलेन सिक्तं दृश्यत एव ॥ ११४ ॥

पुर्विति । पुरुर्गुग्गुलुः । चाङ्गुली[1]वंशरोचना । ताभ्यां कृतधूपः । बोधितरुर्न्यग्रोधस्तस्य त्वग्रसेन-

पुरुचाङ्गुलि[2]कृत धूपैर्बोधितरुत्वग्रसेन चाभ्यक्तः ।
असुरसुरकिन्नरैरपि न दृश्यते संस्थितः पटः सार्द्रः ॥११५॥

चैकत्र कृतेनाभ्यक्तः सिक्तः पटो दैत्यदेवगन्धर्वादिभिरपि न दृश्यते किं पुनर्मनुष्यैः । सार्द्रस्तु स एव पटः संस्थितो दृश्यो भवतीत्यर्थः ॥११५॥

दिनेति । भुजंगारिर्मयूरः । सप्त दिनानि यावन्निराहारीकृत्य

---

१. पञ्चागुलिः वंशरोचना? २. पञ्चांगुलि?

विधार्य्यः स्थापनीयः पश्चादष्टमेऽह्नि प्राप्ते तालशिलाहारः कार्य्यः। तं मयूरं हरितालं मनः शिलां च भोजयेदित्यर्थः। पुनस्तद्विष्ठा ग्राह्या।

दिनसप्तकं विधार्य्यस्तालशिलाहारको भुजङ्गारिः।

तद्गूथेन विलिप्तं न दृश्यते करतलस्थितं द्रव्यम् ॥११६॥

यद् द्रव्यं तया विलिप्तं करतलस्थितमपि तद् द्रव्यं केनापि न दृश्यतेऽदृश्यं भवतीत्यर्थः ॥ ११६ ॥

त्रिदिनेति। त्रीणि दिनानि यावदनाहारो योऽसौ गिरिकच्छपः कृकलासः तेन पूर्वं चीर्णं भक्षितं, अनन्तरं जीर्णं विष्ठात्वमापादितं यद्धरितालं तदादाय तेन वामकरमध्ये लेपादाभरणान्याक्षिपेत्—

त्रिदिनोषित[1] गिरिकच्छपचीर्णं जीर्णञ्च तालमादाय।

तेन करगर्भलेपादाभरणान्याक्षिपेद्वामात् ॥११७॥

॥ इति पटान्त (पटगत) चित्रादर्शनम् ॥

तल्लिप्तवामहस्ततलेन कस्यचिदाभरणानि गृह्णन्केनापि न दृश्यते इत्यर्थः ॥ ११७ ॥

॥ इति पटान्त(पटगत) चित्रादर्शनम् ॥

बीजेति। बीजं पारदं, विषं वत्सनागं, उरुबूकं एरण्डबीजं, सर्पमांसं, गृहगोधिकामांस-

। अथ प्रतिमाकर्षणम्।

बीजं विषमुरुबूकं भुजंगपलभवनगोधिकाङ्कोटैः।

शाखामृगास्थियुक्तैः प्रतिमाकर्षो भवत्येभिः ॥११८॥

॥ इति प्रतिमाकर्षणम् ॥

मङ्कोटमंकोल्हबीजमुच्यते, वानरास्थीनि च। एतैरेकत्रीकृत्य जलपिष्टैर्हस्ततलं प्रलिप्य तेन देवादीनां प्रतिमा स्पृश्यते ततः प्रतिमाकृष्टिर्भवति। ११८।

॥ इति प्रतिमाकर्षणम् ॥

---

१. स्थित[2]

जीवेति । जीवहरं विषं, पारिजातपुष्पम् , हरितालं, सर्पपुच्छं च । एभिरंकोल्लतैलयुक्तैः पिष्टै-

। अथ शंखशुक्त्याकर्षणम् ।

जीवहरपारिजातकतालैर्हालाहलस्य पुच्छेन ।
अंकोल्हतैलयुक्तैराकर्षो भवति शंखशुक्तीनाम् ॥११९॥

॥ इति शंखशुक्त्याकर्षणम् ॥

र्हस्ततललेपात् शंखशुक्त्यादीनामाकृष्टिर्भवति ॥ ११९ ॥

॥ इति शंखशुक्त्याकर्षणम् ॥

कच्छपेति ॥ कच्छपस्य जीवविशेषस्य मस्तकं चरणश्च इन्द्रगोपश्च एतैरौषधैः पक्वतैलानि कर्तृणि-

। अथ कुचनाशः ।

कच्छपमस्तकचरणैः सुरेन्द्रगोपैश्च पक्वतैलानि ।
ललनाकुचप्रणाशं प्रलेपनात्संप्रकुर्वन्ति ॥ १२० ॥

॥ इति कुचनाशः ॥

कुचलेपान्नारीणां कुचापहारं कुर्वन्ति ॥ १२० ॥

॥ इति कुचनाशः ॥

गिरीति ॥ गिरिकर्णिका प्रसिद्धा, इन्द्रगोपश्च, शतपादिकाऽपि, सहस्रचरणोऽर्कवृक्षश्च । एतान्येकीकृत्य चूर्ण्यन्ते । एवंप्रकारेण जनितोऽयं रेणुराजश्चूर्णराजः भगक्षतं संकोचयति अन्यान्यपि व्रणरंध्राणि

। अथ भगसंकोचनाधिकारः ।

गिरिकर्णिकेन्द्रगोपकशताङ्घ्रिकाख्यासहस्रचरणश्च ।
इतिजनितरेणुराजो वराङ्गरन्ध्राणि रोहयति ॥१२१॥

अनेन चूर्णेन रोहन्ति किमुत नारीवरांगरंध्रमित्यत एवासौ रेणराज इत्युक्त इति ॥ १२१ ॥

ललनेति। विचलत् चलनशीलं यद् गोगवलं गोशृगं तस्याधोभागस्य यो रेणुश्चूर्णं तेन रतिलेपाद्रतिस्थानीयवरांगलेपादित्यर्थः; ललना नारी पुरुषाणां गम्याऽभिगमनीया न भवति। संकुचितवराङ्ग-

ललना न भवति गम्या विचलद्गोगवलरेणुरतिलेपात्।
ऊर्ध्वगविषाणलेपात् प्रयाति पूर्वां तथा प्रकृतिम् ॥१२२॥

॥ इति भगसंकोचनाधिकारः ॥

त्वात्। तथा ऊर्ध्वगविषाणलेपात् ऊर्ध्वगं ऊर्ध्वभागस्थं यद् गोशृंगं तच्चूर्णलेपात् पुनर्ललनाया वरांगं पूर्वां प्रकृतिं प्रयाति। पुरुषाणामभिगमनीयतां प्रयातीत्यर्थः। एतेन संकोचविकासावुक्तौ ॥ १२२ ॥

॥ इति भगसंकोचनाधिकारः ॥

प्रमदेति। द्विमुखो योऽहिः सर्पः तस्य रक्तेन रंजितं सूत्रं या नारी उल्लंघयति तस्या नार्या वरांगकुहरात् भगविवरात् क्षयकारी क्षतज-

। अथ भगरक्तप्रवाहः।

प्रमदा या लंघयति द्विमुखाहिक्षतजरंजितं सूत्रम्।
प्रगलति वरांगकुहरात् क्षयंकरः क्षतजनिर्झरस्तस्याः ॥१२३॥

॥ इति भगरक्तप्रवाहः ॥

निर्झरो रक्तप्रवाहो विगलति निरंतरं नोपरमति ॥ १२३ ॥

॥ इति भगरक्तप्रवाहः ॥

महिषेति। मूलस्कन्धौ पत्रं पुष्पं फलं चैतानि पंचांगानि धत्तूरवृक्षस्य चूर्णीकृत्य पञ्चदश भागाः ग्राह्याः। षोडशो भागो वत्सनागविषस्य।

॥ अथ रात्रिमोहधूपः ॥

महिषरुधिरप्रदिग्धः पञ्चाङ्गः षोडशांशविषयुक्तः।
कनकविटपिधूपो रात्रौ चेष्टाहरः पुंसाम् ॥ १२४ ॥

॥ इति रात्रिमोहधूपः ॥

एतत् सर्वमेकविंशतिवारं यावत् माहिषरुधिरेण भावयित्वा छायाशुष्कं विधाय रात्रौ धूपः कर्त्तव्यः। तेन पुरुषस्य सर्वा अपि चेष्टाः प्रणश्यन्तीति। रात्रिग्रहणेन रात्रावेव धूपः पुरुषाणां चेष्टाहरो दिवसे

त्वकिञ्चित्कर इति। रात्रौ त्वासूर्योदयं पुरुषो निश्चेष्टः शून्यो मृत इव भवतीत्यर्थः ॥ १२४ ॥

॥ इति रात्रिमोहधूपः ॥

रजनीति। निम्बवृक्षस्कन्धप्रदेशे योऽसावपरो वृक्ष उद्गच्छति स निम्बजो वन्दाको भवति। तस्य निंबजवन्दाकवृक्षस्य पंचांगचूर्णं प्रदीपे प्रक्षिप्यते स दीपश्चेद् यस्य गृहस्य मध्ये रात्रौ ज्वलति तद्धामनि

। अथ दीपेन काणीकरणम्[1] ।

रजनीसमये दीपो निम्बजवन्दाकरेणुसंयुक्तः ।
प्रज्वलति यत्र भवने भवन्ति काणाः नरास्तत्र ॥ १२५ ॥

॥ इति दीपेन काणीकरणम् ॥

वासिनो जनाः सर्वेऽपि काणा एकलोचनाः भवन्ति परं यावत् स दीपः प्रज्वलति। निर्वाणे च तस्मिन् प्रकृतिस्थापनं भवतीत्यर्थः ॥ १२५ ॥

॥ इति दीपेन काणीकरणम् ॥

गुञ्जेति। गुञ्जायाः रक्तिकायाः फलानि मूलानि च, मोचा धातकी तस्याः कुसुमान्येतान्यौषधान्येकत्र मेलयित्वा यस्य धूपो दीयते तस्य दृष्टिं हन्ति दृष्टिस्फोटको भवतीत्यर्थः। दुग्धपानात् स्वस्थो भवति। भ्रमरं

। अथान्धीकरणबोधौ ।

गुञ्जायाः फलमूलैर्मोचाकुसुमैश्च दृष्टिहा धूपः ।
पयसः पानात् स्वस्थो भवति पुमान् भ्रमराज्यधूपाद्वा ॥१२६॥

॥ इत्यन्धीकरणबोधौ ॥

मधुकरं, मधु, आज्यं गोघृतं ताभ्यां वा धूपात् पुनः स्वस्थो भवति। एतद्द्वययोगाद् दृष्टेरान्ध्यं निवर्त्तत इत्यर्थः ॥ १२६ ॥

॥ इत्यन्धीकरणबोधौ ॥

---

१. नरकाणी[3]

निदधातीति। दिनस्य मध्यन्दिनं मध्याह्नस्तत्र काले लुठितौ परिवर्तितौ यौ पांशुमध्ये खरमहिषौ तयोः शरीरलग्नो यो रेणुस्तं

।अथ कलह (निधानम्)।

निदधाति यत्र भवने मध्यंदिनलुठतिखरमहिषरेणुः।
शाम्यति न तत्र कलहः सुभैरवो वामपाणिना नित्यम् ॥१२७॥

॥ इति कलहनिधानम् ॥

वामपाणिना गृहीत्वा यस्य गृहे निदधाति निक्षिपति तस्य गृहे नित्यं अनवरतं सुभैरवो रौद्रकलहः न शाम्यति नोपरमति ॥ १२७ ॥

॥ इति कलहनिधानम् ॥

पुष्येति। शस्त्रैर्भिन्नस्य शूलप्रोतस्य वा पुरुषस्य कपाले पुष्यनक्षत्रे यवान् धान्यविशेषान् वापयित्वा एडकादुग्धेन सिच्यते तैस्तथा वापितैस्तथा-

।अथान्तर्धानम्।

पुष्ये यवैः कपाले निक्षिप्तैः शस्त्रशूलभिन्नस्य।
आविकपयोऽभिषिक्तैस्तत्फलमाला नरं निगूहयति ॥१२८॥

॥ इत्यन्तर्धानम् ॥

भिषिक्तैश्च यानि फलानि यावद्रूपाणि भवन्ति तानि गृहीत्वा माला कार्या। सा माला शिरसि बद्धा सती पुरुषं साधकं निगूहयति अदृश्यं करोतीत्यर्थः ॥ १२८ ॥

॥ इत्यन्तर्धानम् ॥

मृदिति। मृत् मृत्तिका तयोत्पादितो योऽसौ वारणो गजः तस्य यत् कुंभस्थलं तत्र यद् रध्रं छिद्रं तत्र गतो निक्षिप्तो योऽसौ पिचुमन्द

।अथ मृन्मयगजमदः।

मृद्वारणकुंभस्थलरंध्रगपिचुमन्दसर्जनिर्यासः।
दिनकरकिरणस्पर्शात् मदगजलीलां विधारयति ॥१२९॥

॥ इति अमृन्मयगजमदः ॥

सर्जनिर्यासः: एतद्वृक्षद्वयरसः स आदित्यरश्मिस्पर्शात् मदगजलीलां विधारयति मत्तकरिविलासं वितनोतीत्यर्थः ॥ १२९ ॥

॥ इति मृन्मयगजमदः ॥

प्रविलिप्येति । त्रिकटुकसंयुक्तया रासभीजरया मरिचपिप्पली-शुण्ठीचूर्णयुक्तेन रासभीजरायुणा गर्भपुटेन वामपादं प्रलिप्य तेन पादेन

। अथ द्रुमफलपुष्पाकर्षणम् ।

प्रविलिप्य वामपादं त्रिकटुकसंयुक्तरासभीजरया ।
सकलफलकुसुमवर्षं प्रताडितो मुञ्चति द्रुमस्तेन[1] ॥१३०॥

॥ इति द्रुमफलपुष्पाकर्षणम् ॥

द्रुमस्ताडितमात्रः सन् फलकुसुमसमूहं त्यजति। तस्मिन् वृक्षे पुष्पफलादिकं किमपि न दृश्यत इत्यर्थः ॥ १३० ॥

॥ इति द्रुमफलपुष्पाकर्षणम् ॥

स्पृष्ट इति । शुनीगर्भशय्यया मरिचपिप्पलीशुण्ठीयुक्तयालिप्तं यत् करकमलं तेन वृक्षः स्पृष्टः सन् फलपुष्पसमूहं कामवृक्ष इव कल्पद्रुम इव

। अथ फलपुष्पापादनम् ।

स्पृष्टः करकमलेन त्रिकटुकसरमाजरायुलिप्तेन ।
मुञ्चति फलञ्च कुसुमं वृक्षः खलु कामवृक्ष इव ॥१३१॥

॥ इति फलपुष्पापादनम् ॥

मुञ्चति खलु । स यथा प्रार्थित एव सर्वाणि फलपुष्पादीनि अर्पयति तथाऽयमपि हस्तस्पृष्टमात्रोऽपि सर्वाणि फलकुसुमादीनि प्रयच्छतीत्यर्थः ॥ १३१ ॥

॥ इति फलपुष्पापादनम् ॥

दिनकरेति । अर्कक्षीरेणाभ्यक्ते नवे महाकुंभे अर्कक्षीरेण पुनःपुनर्भाविते तत्रैकपललपरिमितघृतेन-

। अथ दुग्धस्य घृतापादनम् ।

दिनकरदुग्धाभ्यक्ते कुम्भेऽस्मिन् घृतपलैकसंयुक्तम्[2] ।
क्षीरं यावत्सोष्मं तावद्विनिवेशितं सर्पिः ॥१३२॥

॥ इति दुग्धस्य घृतापादनम् ॥

---

१. त्यजति फलकुसुमनिकरं ताडितमात्रो द्रुमस्तेन[3] २. संयुक्ते[2]

सह विनिवेशितं स्थापितं उष्णं गव्यं क्षीरं यावदुष्णत्वं न परित्यजति तावत्सर्वं घटस्थं क्षीरं गव्यघृतसदृशं प्रतिभासते ॥ १३२ ॥

॥ इति दुग्धस्य घृतापादनम् ॥

प्रत्यग्रेति । प्रत्यग्रो नवो योऽसौ कुंभो घटस्तस्य यो गर्भो मध्यं तं गर्भं अर्कक्षीरेण बहुशः पुनःपुनर्भावयित्वा-

। अथ जलस्य तक्रीकरणम् ।

प्रत्यग्रकुंभगर्भं भानुक्षीरेण भावयेद्बहुशः[1] ।
प्रक्षिप्तमात्रमम्भो भवति हि तस्मिन्नवं[2] तक्रम् ॥ १३३ ॥

॥ इति जलस्य तक्रीकरणम् ॥

शोषयित्वा तादृशे च घटे पानीयं प्रक्षिप्तमात्रमेव नवं प्रधानं तक्रं भवति । तस्मिन्पानीयं गोरसवत् प्रतिभासते इत्यर्थः ॥ १३३ ॥

॥ इति जलस्य तक्रीकरणम् ॥

असकृदिति । तद्वत्तेनैव प्रकारेण घटे असकृत् पुनःपुनरर्कक्षीराभ्यक्ते अर्कक्षीरेण पुनः पुनर्भावित इत्यर्थः । एवंविधे शुष्के घटे कपित्थफलं शुष्कं यत् कपित्थफलं तस्य गर्भो मध्यं गरीलक्षणं संचूर्णीकृतस्तत-

। अथ तक्रस्य दधिकरणम् ।

असकृत् क्षीराभ्यक्ते तद्वच्छुष्के कपित्थफलगर्भः ।
चूर्णीकृतः प्रयुक्तस्तक्रं दधिभावमानयति ॥ १३४ ॥

॥ इति तक्रस्य दधिकरणम् ॥

स्तत्र प्रयुक्तः सन् तक्रं दधिभावमानयति । तत्तक्रं दधिसमं भासते इत्यर्थः ॥ १३४ ॥

॥ इति तक्रस्य दधिकरणम् ॥

उपरतेति । उपरता मृतास्ते च ते शुष्का ये मत्स्या मीनास्तेषां ; अरुष्करो भल्लातकस्तस्य फलं तद्रसेन विलिप्तं पार्श्वं पार्श्वप्रदेशो येषां तेषामेवंकृतानां ततः शीतले जले प्रक्षिप्तानां सतां तत्क्षणा-

---

१. बहुधा[२]   २. वरं[२]

। अथ मृतसञ्जीवनाधिकारः ।

उपरतसंशुष्काणामारुष्कररसविलिप्तपार्श्वानाम् ।
शीताम्भसि मत्स्यानां भवति पुनर्ज्जीवितं निमिषात् ॥१३५॥

॥ इति मृतसञ्जीवनाधिकारः ॥

देव जीवनं भवति। मृता अपि मत्स्या अनेन विधिना पुनर्ज्जीवन्तीत्यर्थः ॥ १३५ ॥

॥ इति मृतसञ्जीवनाधिकारः ॥

पुरुषेति । मृतपुरुषपार्श्वजो मृतपुरुषपार्श्वस्थितौ योऽसौ शंकुः कीलकः स दीर्घग्रीवास्थिरन्ध्रे उष्ट्रास्थिच्छिद्रे क्षिप्तः सन् नरनार्योः सुरताधिरूढियोर्वरांगबंधं योनिलिंगं बद्धं कुरुते यदैव तौ—

। अथ नारीपुरुषगुह्यबन्धमोक्षौ ।

पुरुषाङ्गनयोरचिराद्दीर्घग्रीवास्थिरंध्रनिक्षिप्तः ।
कुरुते वराङ्गबंधं सुरते मृतपुरुषपार्श्वजः शङ्कुः ॥ १३६ ॥

॥ इति नारीपुरुषगुह्यबन्धमोक्षौ ॥

सुरताधिरूढौ भवतस्तदैव स कीलकस्तत्रच्छिद्रे चेन्नि क्षिप्यते तदा पुरुषस्य लिंगं योनिमध्यान्न निःसरतीत्यर्थः। तथैव शंकावस्थिरंध्रमध्यादाकृष्टे सति नरनार्योरपि लिंगं योनिस्तयोरचिराच्छीघ्रमेव वियोगो भवतीत्यर्थः ॥ १३६ ॥

॥ इति नारीपुरुषगुह्यबन्धमोक्षौ ॥

सरिदिति । सरित्समुद्रगामिनी नदी तस्याः पूर्वापरतटान्तमृत्तिका, सुरते आसक्तौ यौ सारमेयौ कुक्कुरीकुक्कुरौ तयो रोमाणि। एतानि पूर्वोक्तमृदा सह तद्गुटिकां कृत्वा सा यं पुरुषमुद्दिश्यांकोल्लतैलमध्ये क्षिप्यते स पुरुषो यस्मिन्नासने पीठे पादिकायामास्तरणके हस्तिनि अश्वे नरे रथे-

। अथासनबन्धः ।

सरिदुभयतटान्तमृदा सुरतातुरसारमेयरोमाणि ।
सर्वासनबन्धकरी गुटिकैषाङ्कोल्लतैलसंयुक्ता ॥ १३७ ॥

॥ इत्यासनबन्धः ॥

चेत्यादिके यत्र कुत्रचित्स्थितो भवति तदासनादिकं तद्युतं तेन सह विलग्नमुत्तिष्ठतीत्यर्थः । गुटिकायां तैलादाकृष्टायामासनाद्विमुक्तो भवतीत्यर्थः ॥ १३७ ॥

॥ इत्यासनबन्धः ॥

नयनेति । नयनयोर्युगं नयनयुगं तद्रश्मिमध्यगस्य वकारस्य वर-चन्द्रमण्डलाभ्यासात् नराणां साधकानां अंतर्मध्ये स्थितं ज्योति-र्बहुलान्धकारेऽपि प्रकटीभवति । एवंविधवकाराक्षरा-

। अथान्धकारे ज्योतिर्दर्शनम् ।

नयनयुगरश्मिमध्यगवकारवरचन्द्रमण्डलाभ्यासात् ।
आविर्भवति नराणामन्तर्ज्योतिस्तथान्धकारेऽपि ॥ १३८ ॥

॥ इत्यन्धकारे ज्योतिर्दर्शनम् ॥

मृतबीजध्यानात् साधकस्य समस्तज्ञेयपदार्थस्य प्रकाशकं तेजः सन्मु-न्मीलतीत्यर्थः ॥ १३८ ॥

॥ इत्यन्धकारे ज्योतिर्दर्शनम् ॥

गुर्विति । गुरूणां यन्मुखं वक्त्रकमलं ततोऽधिगतं परिज्ञातं गुरुभिः सुप्रसन्नैर्यन्ममाग्रे एकांते उपदिष्टं सत्तन्मयाज्ञातं । (अन्येभ्यः शास्त्रेभ्यश्च यज् ज्ञातम्) तन्मध्यात् अनुभवमार्गे नीत्वा अनुभवंपथं प्रापय्य अनुभूयेत्यर्थः । तन्मध्याद्यत्स-

अथ शास्त्रमुपसंहरन्नाह—

गुरुमुखतोऽधिगतं यच्छास्त्रान्तरतश्च तन्मया ज्ञातम् ।
अनुभवमार्गे नीत्वा तन्मध्यात्किञ्चिदिह दृष्टम् ॥१३९॥

म्यगनुभवमार्गे समायातं तन्मध्यात्किचिदल्पतमं स्वल्पमात्रं इहाश्चर्य्य-योगरत्नावलीशास्त्रं दृष्टं प्रथितम् । सुखावबोधार्थमार्याबंधेन नीतं मयेत्यनेनाचार्य्यश्रीनागार्ज्जुन आत्मानं निदर्शयतीति ॥ १३९ ॥

आश्चर्येति । आश्चर्याण्येव रत्नानि तेषां माला पद्धतिः, सा नागा-र्ज्जुनाचार्येण विरचिता गुंफिता । कथंभूता ? अनुभवसिद्धा । तथा सह कलाभिश्चतुष्षष्टिसंख्यालक्षणाभिर्वर्तन्ते ये च ते जनाश्च—

अथ ग्रन्थाधिक्यमाह:—

आश्चर्यरत्नमाला नागार्ज्जुनविरचिताऽनुभवप्रसिद्धा ।
सकलजनहृदयदयिता समर्थिता सूत्रतो जयति ॥१४०॥

तेषां हृदयमंतःकरणं तस्य दयिता वल्लभा आश्चर्यरत्नमाला सूत्रतः समर्थिता सूत्रद्वारेण चत्वारिंशदधिकेनैकशतेनार्य्याणां सा जयति सर्वोत्कर्षेण वर्त्तते । रूपकमत्रालङ्कारः ।

इत्यनेन शास्त्रस्याशीर्वादन्ददात्याचार्यः ।

आत्मस्मरणाय मया विवृता नागार्ज्जुनप्रणीतेयम् ।
आश्चर्यरत्नमाला अग्रेतनवृद्धटीकातः ॥ १ ॥

यदशुद्धमिह निरूपितमार्य्यास्तत्क्षम्यतां प्रसादं मे ।
कृत्वा विशोध्यतां तत्को न स्खलति प्रमादनिवहेन ॥ २ ॥

श्रीनृपविक्रमसमये द्वादशनवपङ्क्तिभिरङ्किते वर्षे ।
रचिता गुणाकरेण श्वेताम्बरभिक्षुणा विवृतिः ॥ ३ ॥

॥ इति श्रीसिद्धघटीयश्वेताम्बरपण्डितश्रीगुणाकरविरचिता
श्रीनागार्ज्जुनप्रणीतयोगरत्नमालालघुविवृतिः
समाप्तिमगमत् ॥

सम्पादक-परिचयः

विहारगे पाटलिपुत्रमण्डले
खगोलपार्श्वस्थितमुस्तफापुरे ।
सुजन्म संप्राप्तमनेकपण्डितैः
यशस्विवैद्यैश्च विमण्डिते कुले ॥ १ ॥

विप्रावंतसमगवंशविभूषणोऽसौ
रामावतारविदितो भिषगद्वितीयः ।
धन्वन्तरिप्रतिभटो भुवि राजते स्म
तत्र प्रचण्डयशसा महसा च मित्रः ॥ २ ॥

वाग्देवतार्चनप्रियव्रतचञ्चरीकः
रामावतारभिषजस्तनयो द्वितीयः ।
यस्याग्रजोऽस्ति सुजनः सुधियां वदान्यः
सत्यव्रतः सुकविकैरवकाननेन्दुः ॥ ३ ॥

श्रीसत्यनारायणशास्त्रिवर्यो
वैद्यश्च राजेश्वरदत्तशास्त्री ।
तयोर्गुरूणां महतां तु गुर्वोः
गीर्भिर्गिरां गौरवमादधानः ॥ ४ ॥

साहित्यशास्त्ररसिको भिषजां वरेण्यः
काश्यामधीतसकलोभयवैद्यविद्यः ।
अध्यापन्ननुसरन्नथ विश्वपूर्वे,
विद्यालये वसति हिन्दुपुरःसरेऽस्मिन् ॥ ५ ॥

क्रमेण कालोपहताः निघण्टव-
स्तिरोगताः द्रव्यगुणाकरास्तथा ।
पुनः समुद्धर्त्तुमिहैष तान् मुदा,
प्रियं व्रतं धारयति प्रियव्रतः ॥ ६ ॥

आशुतोषप्रसादेन जगदम्बानुकम्पया ।
व्रतः सारस्वतोऽयं मे साफल्यं समवाप्नुयात् ॥ ७ ॥

APPENDIX—I

Plants mentioned in the Yogaratnamālā.

औद्भिद द्रव्य

अङ्कोल्ल (तैल) ६३
अङ्कोलह १७, १८
अङ्कोलह (तैल) ३५, ११९, १३७
अङ्कोलह (मूलतैल) १११
अङ्कोट ११८
अतिबला ८५
अम्भोरुह ३३
अम्लवेतस १५
अरुष्कर (बीज) ६३
अरुष्कर (रस) १३५
अश्वत्थ ८६
अहिंसा ५५
आत्मगुप्ता ९६
आहक (श्वेतभृङ्गराज) ६२
इङ्गुदी (पुष्प) २६
उत्पल ८७
उरुबूक ११८
कटुकी ७५
कनक ५०, ६९, ७०
कनक (तैल) ५१
कनक (पञ्चाङ्ग) १२४
कपित्थ (फल) १३४
करञ्ज ९७
करञ्ज (तैल) ६६
(काक) जङ्घा ५९
काञ्चनतरु ४७
कामवृक्ष १३१
कामाङ्घ्रिप ४६
कुष्ठ ३
कोकिलेक्षण ५९
कोशाम्र (तैल) १०७
कौशिक (गुग्गुलु) २०
खरमञ्जरी (मूल) ९९
गिरिकर्णिका १२१
गुञ्जा १८२
गुञ्जा (फल-मूल) १२६
चन्द्रसंभव ४०
चाङ्गुलि ११५
चित्र ६९
चूत (दल) १०४
जम्बू (मूलतैल) १११
जीवहर (विष) ११९
तगर २५, ४४, ७३
तगर (फल) १८
तण्डुल (तोय) ७३
तिल (तैल) ५२
तुरगगन्धा ९५
त्रिकटुक ३२, १३०, १३१
दाडिम (मूल) ११०
दाडिम (मूलतैल) १११
दिनकर (दुग्ध) ७२, १३२
दिवाकर (पय) १०९
दुर्गन्धा ४५, ८०
धात्री ९१
धात्री (बीजतैल) ८२
नल (मूल) ४२
नागकेसर ७२
नागिनी ७८

नोलाशोक २८
नीलाशोक (अङ्कुर) २४
पथ्या १०८
पर्णी ५७
पाटला ५६
पाटला (मूल) ३९
पारिजातक ११९
पिचुमन्द (निर्यास) १२९
पियाल (क्राथ) १०२
(शर) पुङ्खा ५९
पुर (गुग्गुलु) ६८
पुरु १९, ११५
बदर (अस्थि) ९८
बला ८५
बालकमूल ७७
बोधितरु ११५
ब्रह्मतरु (बीज) १०९
बृहती ९५
बृहती (फल) ९६
भल्लातक १५
भानु (क्षीर) १२३
भूर्ज (त्वक्) ६०
मञ्जिष्ठा ३
मदनफल ७३
मदनफल ६०
मधुक २३
मन्दार (पुष्प) ११३
मलयभव ७३
मातुल (मूल) ८९
मातुलानी ६९
मातुलुङ्ग ५०
माष ४२
मुनिवृक्ष (पुष्प) ६५
मोचा (कुसुम) १२६
यव ४२, १२८
यवनाल (क्षार) ५४
यष्टी ८५
रक्त हयमार (करवीर) १५
रवि (शलभ) १०८
रवितरु (शलभ) ७१
रोगेन्द्र (कुष्ठ) ४
लशुन ८०
लोहकारस ११२
वचा ६९, ९५
वज्री ७६
वज्री (क्षीर) ५२, १००
वन्दाक ८६
वन्दाक (निम्बज) १२५
वानरी ७२
विष ७०, ७१, ११८, १२४
वेतस (मूल) ४२
व्याधि (कुष्ठ) ७३, ९५
शण (बीजतैल) ८२
शशाङ्ककण्टक २३
शशिज ३९
शूल ९६
श्रवणिका ४०
श्रीफल ४६
श्लेष्मातक (फल) ७५
श्वेतार्क ९४
सर्ज (निर्यास) १२९
सर्जरस ११२
सर्षप (तैल) ८१
सहस्रचरण (अर्क) १२१
सितजङ्घा ६०
सित तुरगमार (मूल) ७१
सितभानु (अर्क) ३
सितभृङ्ग ५९
सित मार्गणपुङ्खिका (मूल) ९७
सितवंशा (वंशरोचना) ६२
सित सिद्धार्थ ८, ९५

स्तब्ध (बीजचूर्ण) ११२

स्तब्धा ३४

स्योनाक ४४

हिङ्गु ८०

हरितरु (मूल) ११४

हयगन्धा ५८

हलिनी १२, २३

ह्रीबीज (ह्रीबेर ?) ५९

APPENDIX—II

Animals and their products mentioned in the Yogaratnamālā.

जान्तव द्रव्य

अक्षिरोम २६
अस्थि १२
आर्त्तव २३
इन्द्रगोप ६१
उरगारि (मयूर) ९७
उलूक ४८
ऐन्द्रिय मल ८८
कफ २१
करज (नख) १६
कुक्कुटाण्ड ६९
कोकिला ४७
कृकलास ६१
क्षीर १७
क्षीरकीट ९८
खद्योत ८२
गोमांस ११०
गोमायु (शृगाल) ४९
गोरोचना २६
गोशृङ्ग ४६
घृत३ ५
चर्म ६६
जरायु १९
छागल ६२
तक्र १३३
ताम्रचूड ७
तुरगखुर ११
दधि ८७
दर्दुरवसा १६
द्विक (काक) ४९
नकुल ४८
नक्र ४५
नवनीत ४५
पारावत ५०
पिशित ८७
पुराणघृत ९०
बलाहक ५२
भवनगोधा १०२
भुजगेन्द्रकवच १०
भूनाग ८१
भ्रमर ८७
मत्स्य १३५
मधु ३०
मूत्र २१
मूर्धज (केश) ५२
रक्त ३
वराहमेद ९४
वर्च्च १२
वानर ४८
विडाल ४८
वृश्चिककण्टक ४१
शंख ११९
शताङ्घ्रिका १२१
शिखिचन्द्र (मयूरपिच्छ) ८१
शिखिपित्त ६३
शुक्ति ११९
षड्बिन्दु ९९
सर्पवसा ७५
स्वेद २१

APPENDIX—III

Minerals mentioned in the Yogaratnamālā

पार्थिव द्रव्य

अंजन ९१

आल ५०, ५३, ६९, ८१

खटिका ७२

गन्धकपाषाण ३६

गन्धकी ३५

गैरिक ४५

ताम्र ९६

ताल ४, ११६, ११७, ११९, २१

त्रिलोह २३

बीज (पारद) ११८

मनः शिला २७, १०८

मृत् १३७

रुक्म ४५

लोहत्रय २४

शिला ८१, ११६

सुधा ५२, ५४

सूत ३५, ९७

सैन्धव ५४

स्रोतोऽञ्जन २३, ६५

हरिताल ३०, ५४

हेम ६१

52